PURANETIHASA

ACHARYA 1st YEAR
Course/Paper.4

PART – B

# शिवमहापुराणम् (विद्येश्वरसंहिता)

## *Śivamahāpurāṇam (Vidyēśvarasaṃhitā)*

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)

CENTER OF DISTANCE & ONLINE EDUCATION
*(Formerly Directorate of Distance Education)*
NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)
*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

।। ॐ नमः शिवाय ।।

## द्वितीयोभागः

# शिवमहापुराणम्



## मङ्गलाचरणम्

शान्ताकारं शिखरिशयनं नीलकण्ठं सुरेशं
विश्वाधारं स्फटिकसदृशं शुभ्रवर्णं शुभाङ्गम् ।
गौरीकान्तं त्रितयनयनं योगिभिर्ध्यानगम्यं
वन्दे शम्भुं भवभयहरं सर्वलोकैकनाथम् ।।

## आमुखम्

वेदवत् पुराणम् अतीव प्राचीनं प्रामाणिकञ्च शास्त्रमस्ति । तच्छास्त्रञ्च ईश्वरनिश्वासवत् नित्यमिति वेदोपनिषत्सु शास्त्रेष्वपि गृहीतमस्ति । तद्यथा- 'अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः, सामवेदोऽथर्वाङ्गिरस इतिहास पुराणम् ।' (वाजसनेयी ब्राह्मणोपनिषत् २/४/१०) । पुराणानि ज्ञानमयस्य त्रिकालदर्शिनो वेदस्य भाष्यभूतानि एव सन्ति ।

पुरा पुराणमेकमेवासीत् । शतकोटिप्रविस्तरं तद् विशालकायं पुराणं पठितुं साधारणजना असमर्थाः आसन् । अतः भगवान् व्यासदेवः तद् विशालकलेवरं पुराणमष्टादशधा विभज्य अष्टादशमहापुराणानि रचयामास । एवं वर्तमानाष्टादशपुराणानां निर्माणस्य श्रेयो महर्षेः कृष्णद्वैपायनव्यासदेवस्यैवास्ति । येन देवलोके अद्यापि विद्यमानस्य शतकोटिप्राविस्तरस्य मूलपुराणस्य सारं संगृह्य चतुर्लक्षश्लोकद्वारा अष्टादशपुराणरूपेण संग्रन्थ्य मानवमात्रस्य परमं कल्याणं कृतम्।

तेषु अष्टादशपुराणेषु मुख्यतो भगवतः विष्णोः, देव्याः भगवत्याः तथा परमेश्वरस्य शिवस्य चरित्रं महत्त्वञ्च प्राधान्येन वर्णितं विद्यते । स्कन्दपुराणानुसारम् 'अष्टादशपुराणेषु दशभिः गीयते शिवः' इत्यनुसारं प्रायः सर्वेषु पुराणेषु शिवस्य माहात्म्यं गीतमिति प्रतीयते । तथा च शिवतत्त्वप्रतिपादकेषु शैवपुराणेषु शिवस्य तत्त्वं माहात्म्यञ्च निरूपितं वर्त्तते । शैवपुराणेषु शिवतत्त्वपुराणं शैवतत्त्वसम्बलितं सर्वश्रेष्ठं महापुराणमस्ति । अत्र शिवतत्त्वं पल्लवितं, पुष्पितं पूर्णतया विकशितञ्चास्ति । शैवदर्शनस्याधारेण रचितमिदं पुराणं वेदसारसम्बलितं शैवागमसिद्धान्त-समन्वितं शिवभक्तानां महोल्लासकरं सर्वेषां प्राणिनामुपकारकञ्च पुराणमस्ति । अत उच्यते-

शैवं पुराणमिदमात्मवतां वरिष्ठं सेव्यं सदा परमवस्तुसत्तां समर्च्यम् ।
तापत्रयाभि-शमनं सुखदं सदैव प्राणप्रियं विधिहरीशमुखामराणाम् ।।

(शै.पु. ९/५०)

आदौ शिवपुराणं द्वादशसंहितं लक्षसंख्यकश्लोकसमन्वितञ्चासीत् । कलिजानाम् आयुर्बलबुद्धीनां ह्रासं विज्ञाय भगवान् व्यासः तत्संक्षिप्य सप्तसंहितात्मकं चतुर्विंशतिसहस्रश्लोकयुक्तं चकार । तद्यथा-

न्यासेन तत्तु संक्षिप्तं चतुर्विंशत्सहस्रकम् ।

शैवं तत्र पुराणं वै चतुर्थं सप्तसंहितम् ।। (शि.पु. ७/१/५२)

शिवपुराणस्य सप्तसंहिता: यथा- (१) विद्येश्वरसंहिता, (२) रुद्रसंहिता, (३) शतरुद्रसंहिता, (४) कोटिरुद्रसंहिता, (५) उमासंहिता, (६) कैलाससंहिता, (७) वायवीयसंहिता । तद्यथा शिवपुराणे-

विद्येश्वराख्या तत्राद्या द्वितीया रुद्रसंहिता ।

तृतीया शतरुद्राख्या कोटिरुद्रा चतुर्थिका ।।

पञ्चमी कथिता चोमा षष्ठी कैलाससंहिता ।

सप्तमी वायवीयाख्या सप्तैव संहिता मता ।।(वा.सं. १/५९-६०)

तासु सप्तसंहितासु भगवत: शिवस्य महत्त्वं, सम्पूर्णं चरित्रं, विविधोदारतापूर्णानां लीलाकथानां वर्णनं तथा शैवसिद्धान्तानां प्रतिपादनं समुपलभ्यते । तथा च शिवसम्बन्धिनां व्रतोपवास-पूजापद्धति-तपस्या-योगसाधनादीनां महत्त्वपूर्णं निरूपणं प्रदत्तं विद्यते । पुराणलक्षणानां प्रतिपादनप्रसङ्गे सप्तसंहिंताया: सृष्टिखण्डे सृष्टिविषयकवर्णनं वर्णितं विद्यते । तथा च उमासंहितायां सर्गविषये विशदवर्णनं समुपलभ्यते । उमासंहितायाञ्च ब्रह्माण्डवर्णने जम्बुद्वीपविवरणं तथा प्लक्षादिषड्द्वीप-वर्णनं विद्यते । तत्र च सूर्यादिग्रहस्थितिनिरूपणं तथा जनलोकविषये विवरणं प्रदत्तं विद्यते । कश्यपपत्नी-नामपत्यानि तत्र वर्णितानि सन्ति । मनुनवपुत्राणाम् इक्ष्वाक्वादीनां वंशवर्णनं तत्र उमासंहितायाञ्च विद्यते । मन्वन्तरवर्णनप्रसङ्गे चतुर्दशमन्वन्तरानुकीर्तनं तस्यां संहितायाम् एव समुपलभ्यते । शिवपुराणस्य सप्तसंहितासु पुराणलक्षणै: साकं शिवतत्त्वस्य सुविशदं निरूपणं प्रस्तुतमस्ति ।

आद्या संहिताऽस्ति । शिवपुराणे प्रदत्तासु सप्तसंहितासु विद्येश्वरसंहिता । पञ्चविंशत्यध्यायसंयुक्तेयं संहिता १३९६ श्लोकविशिष्टाऽस्ति । परीक्षार्थिनां सौविध्यार्थम् अस्या: संहिताया: पञ्चविंशति: अध्याया: पञ्चांशेषु विभक्ता: सन्ति । द्वितीयभागे षष्ठांशात् दशमांशमध्ये एते पञ्चविंशति: अध्याया: आलोचिता: सन्ति ।

षष्ठे अंशे प्रथमत: नैमिष्यारण्ये यज्ञदर्शनार्थमागताय सूताय कलौ जनानां श्रेयस: उपायविषये मुनीनां प्रश्न: वर्णितो विद्यते । तत: कलिदोषदूषितानां स्वधर्माचाररहितानां जनानां मुक्त्युपायनिरूपणे सूतेन शिवपुराणप्रस्ताव: वर्णितो विद्यते । तत्र च शिवपुराणस्य श्रवणविधि: वक्तु: श्रोतुश्च लक्षणं निरूपितं वर्तते । शिवलिङ्गस्य तथा वेरस्य पूजनम्, साध्यसाधकसाधन-तत्त्वञ्च अस्मिन् अंशे निरूपितं विद्यते ।

सप्तमेऽंशे शिवस्य महत्त्वप्रतिपादनप्रसङ्गे विधिविष्णुमध्ये युद्धं प्रवर्णितं विद्यते । युद्धरतयोः विधिमाधवयोः मध्ये ज्योतिस्तम्भस्याविर्भावः तथा मिथ्यावादिनो ब्रह्मण अपूज्यत्वं केतकपुष्पस्यापि शिवपूजायाः बहिस्करणम् अत्र प्रतिपादितं विद्यते । अंशेऽस्मिन् प्रतिपादितं शिवरात्रितत्त्वं तथा पञ्चकृत्यतत्त्वं शिवपुराणस्य वैशिष्ट्यं व्यनक्ति । ओंकारस्वरूपं तथा जपविधानमत्रापि सुष्ठु निरूपितमस्ति । अष्टमेऽंशे लिङ्गस्थापनविधिः तथा पूजनप्रकारो विशदतया प्रतिपादितो विद्यते । शिवक्षेत्रस्य माहात्म्यं तथा तत्र वासस्य माहात्म्यम् अस्मिन् अंशे प्रतिपादितं विद्यते । पापभेदाः तथा सदाचारम् अत्र च निरूपितं वर्त्तते ।

प्रचलितपाठ्यक्रमस्यास्मिन् नवमेऽंशे यज्ञतत्त्वप्रतिपादनप्रसङ्गे अग्नियज्ञ-देवयज्ञ-ब्रह्मयज्ञानां तत्त्वं प्रकाशितमस्ति । फलाप्तये पार्थिवपूजनप्रवञ्श्चात्र निरूपितों विद्यते । महानैवेद्यजान्मनैवेद्यविषये अत्र वर्णनं समुपलभ्यते । विन्दुनादात्मकं तत्त्वं, प्रणवपञ्चाक्षरमाहात्म्यञ्च सुष्ठुतया निरूपितं विद्यते । बन्धमोक्षरूपशिवलिङ्गस्य माहात्म्यं तथा लिङ्गभेदश्चात्र वर्णितों विद्यते ।

दशमेऽंशे भस्मतत्त्वप्रतिपादितमस्ति । प्रसङ्गेऽस्मिन् भस्मभेदः, भस्मधारणविधिः भस्ममाहात्म्यञ्च निरूपितं वर्त्तते । रुद्राक्षतत्त्ववर्णने रुद्राक्षभेदः रुद्राक्षधारणविधिः, रुद्राक्षमाहात्म्यञ्च प्रस्तुतमस्ति । शिवनैवेद्यस्य विल्वपत्रस्य माहात्म्यम् चात्र वर्णितं विद्यते ।

शिवपुराणे परमेश्वरः शिवः ब्रह्मरूपेणाभिहितोऽस्ति । भगवान् शिवः सर्वेश्वरः शुद्धसत्त्वस्वरूपः स्वतन्त्रः परिपूर्णः स्वेच्छाधीनः प्रावृतवपुः लक्ष्यलक्षणवर्जितश्च । अखण्डजगदण्डानां पिण्डीकरणपण्डितः सर्वस्य जगतः पतिः शिवः औदार्यवीर्य-गाम्भीर्य-माधुर्य-मकरालयः चास्ति । तस्य सदृशः अथवा तस्मादधिकः कोऽपि नास्ति । सः सर्वे भूतानाम् अतुलः राजराजश्च तिष्ठति । सदा जनानां हृदये सन्निविष्टोऽस्ति, स केनापि नाभिलक्ष्यते । एकं वीजं यः बहुधा करोति स एव महेश्वरः । अनेन परमेश्वरेण शिवेन एव जगत् प्रथमं संप्रसूयते । अन्तकाले पुनश्च इदं विश्वं तस्मिन्नेव प्रलीयते ।

महाप्रलयकाले स्थावरजङ्गमे नष्टे सति सर्वमनर्कग्रहतारकं तमोमयमासीत् । अचन्द्रमनहोरात्रमनग्न्यनिलभुजलञ्चासीत् । तदा केवलम् एकम् एव ब्रह्म अवशिष्टमासीत् । तदेवब्रह्म अनामगोचरम् अवाङ्विषयं रूपगुणादिविवर्जितं विकाररहितं निर्गुणं निर्विकल्पं सर्वव्यापकं चिदात्मकञ्चासीत् । सृष्टिकाले अमूर्तस्य तस्यैव इच्छया काचित् सदाशिवाख्या मूर्तिपरिकल्पिताऽभूत् । पराख्यस्यामूर्तेः सगुणमूर्तिः सदाशिवोऽस्ति । अर्वाचीनाः पराचीनाः बुधाश्च तमेव ईश्वरमिति वदन्ति । स च सदाशिव स्वशरीरात् अनपायिनीं विकृतिवर्जितां

मायां प्रधानं प्रकृतिञ्च सृष्टवान् । त्रिदेवजननी मूलप्रकृतिः स्वमाययेदं ब्रह्माण्डमसृजत् । सा शक्तिः वेदपुराणादिषु अम्बिका प्रोक्ता । तया युक्तः पुमान् शिवः विश्वं सृजति । स शिवः परमेश्वरः परः पुमानीश्वरः । तद्यथा शिवपुराणे–

परः पुमानीश्वरः स शिवः शम्भुरनीश्वरः ।
शीर्षे मन्दाकिनीधारा भालचन्द्रस्त्रिलोचनः ।।
पञ्चवक्त्रः प्रसन्नात्मा दशबाहुस्त्रिशूलधृक् ।
कर्पूरगौरसुस्मितो भस्मोद्धूलितविग्रहः ।।

**शिवपुराणस्य समयः—**

शिवपुराणे तान्त्रिकतायाः पूर्णः प्रभावो दृश्यते । भास्करप्रणीतशिवसूत्रवार्तिकस्योद्धरणं शिवपुराणे समुपलभ्यते । अल्वेरुणिना सङ्केतितायां पुराणसूच्यां शिवपुराणस्य नामोल्लेखः विद्यते । अल्वेरुणेः समयः दशमशतकमिति ऐतिहासिकानां मतमाधारीकृत्य तथा च शिवपुराणे तान्त्रिकयुगस्य तथा शिवसूत्रवार्तिकस्य प्रभावं लक्षीकृत्य शिवपुराणस्य समयः दशमशताब्दीति वक्तुं शक्यते ।

— ० —

## षष्ठोऽंशः

**प्रस्तावना—**

श्रीशिवमहापुराणं शिवतत्त्वसम्बलितं सर्वश्रेष्ठं शैवपुराणमस्ति । पुरा पुराणमिदं द्वादशसंहितं लक्षसंख्यकं श्लोकसंयुक्तमासीत् । परन्तु कलौ जनानां हिताय भगवान् व्यासदेवः तद् संक्षिप्य सप्तसंहितविशिष्टं तथा चतुर्विंशति-सहस्रश्लोकसमन्वितं चकार । तासु सप्तसंहितासु विद्येश्वरसंहिता आद्या संहिता अस्ति । अस्यां संहितायां शिवतत्त्वस्य सुविशदं निरूपणं विद्यते । पञ्चविंशति अध्यायसंयुक्ता इयं संहिता १३९६ श्लोकविशिष्टा अस्ति । परीक्षार्थीणां सौविध्यार्थम् इयं संहिता अत्र पञ्च अंशेन विभाजिता विद्यते । प्रथमे अंशे नैमिषारण्ये मुनियज्ञावलोकनाय आगताय सूताय मुनिप्रश्नं वर्णितमस्ति । ततः सूतेन नृणां श्रेयसाधनस्य शिवपुराणस्य महत्त्वं पुस्तकपूजनविधानञ्च कथितम् । तत्र तत्संहिताभेदञ्च प्रदर्शितम् । तृतीयोऽध्याये साध्यसाधनसाधकतत्त्वं वर्णितमस्ति । चतुर्थोऽध्याये मुक्तिसाधनानि विहितानि सन्ति । पञ्चमोऽध्याये शिवलिङ्गवेरयोश्च पूजनं निरूपितं वर्त्तते ।

**उद्देश्यम्—**

प्रिय पाठकाः ! भवन्तः एतस्मिन् प्रथमे अंशे शिवपुराणस्य विद्येश्वरसंहितायाः एतान् विन्दून् पठिष्यन्ति ।

- यज्ञदर्शनार्थमागताय सूताय मुनिप्रश्नवर्णनम्
- कलिदोषदूषिताः वर्णाश्रमधर्माः ।
- शिवपुराणस्य महत्त्वम् ।
- शिवपुराणे संहिताभेदः ।
- शिवपुराणस्य वक्तुः श्रोतुश्चलक्षणम् ।
- शिवपुराणस्य श्रवणविधिः ।
- शिवलिङ्गस्य तथा वेरस्य पूजनम् ।
- साध्यसाधनसाधकतत्त्वम् ।

--०--

**यज्ञदर्शनार्थमागताय सूताय मुनिप्रश्नः—**

धर्मक्षेत्रे महाक्षेत्रे गङ्गाकालिन्दीसङ्गमे परमपुण्ये प्रयागे सत्यव्रतपरायणाः संशितात्मानः मुनयः महासत्रस्य आरम्भं चक्रुः । तत्र यज्ञं समाकर्ण्य व्यासदेवशिष्यः पौराणिकोत्तमः सूतः यज्ञदर्शनार्थं तत्र आजगाम । आयान्तं तं सूतं दृष्ट्वा हर्षिताः मुनयः तदा सुप्रसन्नेन चेतसा तस्य पूजां चक्रुः । ततो विनयसंयुक्ताः ते महात्मानः तस्य महामुनेः यथाविधिस्तुतिं कृत्वा उक्तवन्तः यत्– हे महाभाग रोमहर्षण ! भवान् सर्वज्ञः, अस्माकं भाग्यगौरवात् अत्र आगतः । अखिलां पुराणविद्यां भवान् साक्षात् व्यासात् अधीतवान्, तस्मादाश्चर्यभूतानां कथानां कथने त्वं हि भाजनमस्ति । यच्चभूतं भविष्यं वर्त्तमानम् अन्यत् च सर्वं वस्तुं भवान् जानाति । त्रिषु लोकेषु तव किञ्चित् अविदितं नास्ति । अदृष्टवशात् भवान् अत्रागतः । अतः अस्माकं कल्याणार्थं भवान् श्रेयो वक्तुमर्हति । घोरे कलियुगे पुण्यविवर्जिताः नराः दुराचाररताः भवन्ति । वर्णाश्रमधर्मं त्यक्त्वा अधर्माचरणं कुर्वन्ति । एतेषां नष्टबुद्धीनां स्वधर्मत्यागशीलीनाम् इहलोके परलोके च कथं गतिर्भवेत् ? इति अस्माकं चित्तं चिन्ताकुलं जायते । संसारे परोपकारसदृशोऽपरे धर्मो नास्ति । येन लघूपायेन सद्योऽघनाशनं भवेत् तत् कथय इति ।

**बोधप्रश्नः—**

१. अखिलां पुराणविद्यां सूतः कस्मादधीतवान् ?

२. संसारे कः परो धर्म उक्तः ?

**कलिदोषदूषिताः वर्णाश्रमधर्माः—**

घोरे कलियुगे नराः पुण्यविवर्जिताः दूराचाररताः सत्यवार्त्तापराङ्मुखाः परापवादनिरताः भवन्ति । ते परद्रव्याभिलाषिणः परस्त्रीसक्तमानसाः परहिंसापरायणा च भवन्ति । मातृपितृकृतद्वेषाः कामकिङ्कराः मूढाः नास्तिकाः पशुबुद्धयः स्त्रीदेवास्तेशरीरम् आत्मदृष्ट्या चिन्तयन्ति ।

कलियुगे विप्राः लोभग्रहग्रस्ताः वेदविक्रयजीविनः भवन्ति । धनार्जनार्थं स्वजातिकर्म त्यक्त्वा प्रायशः परवञ्चकाः त्रिकालसंध्याहीनाः ते आचारव्रतलोपं कुर्वन्ति । अदयाः ब्रह्मबोधविवर्जिताः क्रूरस्वभावाः मलिनाशयाः ते कृषिकर्मरताश्च भवन्ति । तथा च सर्वे क्षत्रियाः स्वधर्मत्यागं कृत्वा पापाचारपरायणाः भवन्ति । असूराः अरणप्रीताः पलायनपरायणाः कुचौरवृत्तयः कामकिङ्करचेतसः शास्त्रास्त्रविद्यया हीनाः धेनुविप्रावनोज्झिताश्च भवन्ति । भोगतत्पराः ते प्रजापालनकर्म त्यजन्ति । प्रजासंहार–जीवहिंसादिषु कर्मसु आनन्दम् अनुभवन्ति । पुनश्च वैश्याः स्वधर्मत्यागशीलिनः कुपथाः

स्वार्जनरतातुलाकर्मकुवृत्तय: गुरुदेवद्विजातिषु भक्तिं न कुर्वन्ति । कृपणा: बद्धमुष्टय: सुरतामलिनाशाया: ते वैश्या: लोभमोहविचेतस्काश्च भवन्ति । तद्वत् शूद्रा: ब्राह्मणाचारतत्परा: भवन्ति । स्वधर्माचरणं त्यक्त्वा तपसां कर्त्तारो भूत्वा मन्त्रमुच्चारयन्ति । प्रतिकूलविचारा: कुटिलास्ते द्विजं दूषयन्ति । तद्यथा शिवपुराणे–

धनवन्त: कुकर्माणो विद्यावन्तो विवादिन: ।
आख्यायोपासनाधर्मप्रवक्तारो धर्मलोपका: ।। (वि.सं. १/१८)

स्वधर्मरहितामूढा: क्रूरबुद्धय: नरा: वर्णधर्मं लोपयिष्यन्ति मुदान्विता: ते द्विजान् पीडयन्ति ।

**बोधप्रश्न:—**

१. कलौ लोभग्रस्ता: ब्राह्मणा: किं कुर्वन्ति ?

२. के ब्राह्मणाचारतत्परा: भवन्ति ?

कलौ प्रायश: स्त्रिय: यर्त्तवज्ञानकारिका भ्रष्टा भवन्ति । श्वरद्रोहकारिण्य: निर्भयामलिनाशया: कुहावभावनिरता: कुशीलास्मरविह्वला स्वस्वामिविमुखा: नित्यं जारसंगमभिवाञ्छन्ति । तनयाश्च मातृपित्रो: भक्तिहीना: दुराशया: भवन्ति । अविद्यापाठकास्ते नित्यं रोगग्रसितदेहका: भवन्ति ।

**श्रीशिवपुराणस्य माहात्म्यम्—**

शिवपुराणं सर्वसिद्धान्तनिष्पन्नं भक्तिविवर्द्धकं शिवतोषकरं महोत्तमं शास्त्रमस्ति । पुरा शास्त्रमिदं स्वयं शिवेन प्रोक्तमभूत् । कलियुगे पापग्रस्तानां जनानां हिताय सनत्कुमारस्योपदेशात् भगवान् व्यासदेव: एतत्पुराणं रचितवान् । विशेषत: कलिजानां मन: शुद्ध्यै: एतस्मादपरं किमपि पुराणं नास्ति । एतत् पुराणं क्षितौ शिवरूपं ज्ञेयम्, अत: सर्वथा सादरं सेवनीयमस्ति । अस्य पुराणस्य पठनात् श्रवणात् च नरसत्तम: सद्य: शिवपदं लभते, प्रेम्णा अस्य पुराणस्य पठनं सर्वकामफलप्रदायकञ्च भवति । शम्भो: पुराणस्य पठनात् श्रवणात् नर: निष्पापो जायते, इह सर्वान् भोगान् भुक्त्वा अन्ते शिवलोकमवाप्नुयात् । शतराजसूयेनाग्निष्टोमेन यज्ञेन यत् पुण्यं लभते, तत्पुण्यं शम्भो: कथाश्रवणमात्रत: लभते । ये मनुष्या: नि:श्रेयसस्थानं गन्तुं वाञ्छन्ति ते सदा भक्त्या अमलं शैवपुराणं शृण्वन्तु । ये मुहूर्तं तदर्द्धम् अथवा क्षणं च शिवपुराणं शृण्वन्ति तेषां कदापि दुर्गति: न भवेत् । तत्पुराणं शृण्वान: पुरुष: कर्माटवीं दग्ध्वा संसारं निस्तरति । विशेषत: कलौ शैवपुराण–श्रवणादृते पुंसां परो धर्मो नास्ति । शम्भो: पुराणश्रवणं तथा नामसंकीर्त्तनं मनुष्याणां कृते कल्पद्रुमफलमिति न संशय: । कलौ धर्माचरोज्झितात्मनां दुर्मेधसां पुंसां

हिताय शम्भुः शिवपुराणाख्यं सुधारसं विदधे । पुमान् तत्सुधारसस्य पानं कृत्वा अजरामरः स्यात्, कुलञ्च अजरामरं कुर्यात् । शिवपुराणमाहात्म्ये अथोच्यते–

सदा सेव्या सदा सेव्या सदा सेव्या विशेषतः ।
एतच्छिवपुराणस्य कथा परमपावनी ।।
पुमानज्ञानतस्तावद् भ्रमतेऽस्मिन् भवे मुने !
यावत् कर्णगतं नास्ति पुराणं शैवमुत्तमम् ।।

वेदान्तसारसर्वस्वं शैवपुराणं सर्वाघौघोद्धारकं परत्र परमार्थप्रदञ्च । कलिकल्मषविध्वंसि चतुर्वर्गप्रदं पुराणमिदं यः पठति स नूनं सुसद्गतिं याति । यावत् शिवपुराणं नोदेष्यति तावत् महोत्पाताः सञ्चरिष्यन्ति। शास्त्राणि परस्परं विवदिष्यन्ति । क्रूराः निर्भयाः यम भटाः सञ्चरिष्यन्ति, सर्वे मन्त्राः पीठानि तथा सिद्धान्ताः महीतले विवदन्ति । एतत् शिवपुराणं यः प्रत्यहमतन्द्रितः सन् भक्त्या पठेत् स जीवन्मुक्तः कथ्यते । यः पुराणमिदं भक्त्या अर्चयेत् स अश्वमेधस्य फलं प्राप्नोति इति संशयः नास्ति । य अन्यतः शृणुयात्, सोऽपि पातकात् मुच्येत् । एतत्पुराणं यो दूरतः नमस्करोति स सर्वदेवार्च्चनफलं प्राप्नोति । इदं पुराणं लिखित्वा यः शिवभक्तेभ्यः प्रयच्छति तस्य सर्वशास्त्राध्ययनादिकं फलं सम्भवेत् । पुराणस्यास्य प्रत्यक्षरं पाठकाय पुरश्चर्याफलं प्रयच्छति । चतुर्दश्यामुपोषितः रात्रौ जागरणान्वितश्च सन् य इदं पुराणं पठेत् अथवा शृणुयात् तस्य सर्वतीर्थफललाभः भवेत्, स इहाखिलान् कामान् भुक्त्वा अन्ते निर्वाणं व्रजेत् । शिवपुराणं य अहर्निशं गायति तस्याज्ञाम् इन्द्रपुरोगमाः देवाः प्रतीक्षन्ते । स यत् सत्कर्म करोति तत्कोटिगुणितं भवेत् ।

**बोधप्रश्नः—**

१. कदा महोत्पाताः सञ्चरिष्यन्ति ?

२. पुराणस्यास्य प्रत्यक्षरं पाठकायं किं प्रयच्छति ?

शिवपुराणपठनस्य माहात्म्यं केनापि वक्तुं न शक्यते । अस्य पुराणस्य श्रीरुद्रसंहितां यः समाहितः सन् भैरवप्रतिमान्तिके अथवा वटविल्वयोः प्रदक्षिणां प्रकुर्वाणः संपठेत् तस्य ब्रह्महत्या निवर्त्तते । कैलाससंहिता साक्षात् ब्रह्मस्वरूपिणी प्रणवार्थप्रकाशिका परमा स्मृता । तस्याः संहितायाः सम्पूर्णं माहात्म्यं केवलं शङ्करः जानाति । तदर्द्धं व्यासः तदर्द्धञ्च सूतः जानाति । तां संहितां मासमात्रं पठित्वा ब्रह्महत्यादिभ्यः नरः मुच्यते । तां संहितां भक्त्या पठन् यः श्राद्धे द्विजान् भोजयेत् तस्य सर्वे

पितरः शम्भोः परमपदं यान्ति । तत्र अन्या अपि सर्वाः संहिताः सर्वकामफलप्रदाः सन्ति ।

सप्तसंहिताविशिष्टं दिव्यं शिवसंज्ञकं पुराणं प्रथमं शिवेन कीर्त्तितमभूत् । पश्चात् शैवप्रवणेन व्यासेन च संगृहीतमभूत् । इदं पुराणं सकलजीवगुणोपकारं तापत्रयघ्नमतुलं सतां शिवदं चास्ति । वेदान्तविज्ञानमयः कैतगीरहितधर्म इह प्रतीतः । पुराणेऽस्मिन् भक्तिज्ञानविरागकं वेदान्तवेद्यं सद्वस्तु विशेषेण प्रवर्णितमस्ति । यो नित्यं शिवपुराणस्य श्लोकं श्लोकार्द्धमेव स्वमुखेन पठति स परमां गतिं प्राप्नोति । अन्तकाले यश्चैनं भक्तितः शृणुयात्, सुप्रसन्नो महेशानः तस्मै स्वं पदं प्रयच्छति । य एतच्छिवपुराणं नित्यं पूजयेत्, स इहाखिलान् कामान् भुङ्क्त्वा अन्ते शिवपदं लभेत् । शैवसर्वस्वं तापत्रयाभिशमनं चतुर्वर्गफलप्रदं वेदेतिहासशास्त्रेषु श्रेयस्करं परमसुखदम् अधौधविध्वंसकरं मनः शुद्धिविधायकं शिवसन्तोषप्रदमिदं पुराणं सतां सदा सेव्यमस्ति ।

**बोधप्रश्नः—**

१. शिवपुराणं केन संगृहीतमभूत् ?

२. कः जीवन्मुक्त उच्यते ?

**शिवपुराणे संहिताभेदः—**

श्रीशिवपुराणं सर्वसिद्धान्तनिष्पन्नं भक्तिज्ञानवैराग्यविवर्द्धकं शैवशास्त्रमस्ति । सृष्ट्यादौ पुराणमिदं परमेश्वरेण शिवेन प्रोक्तमभूत् । शिवप्रोक्तं तत् शिवपुराणम् एकलक्षश्लोकयुक्तं द्वादशसंहिताविशिष्टं विशालं पुराणमासीत् । ताः संहिताः यथा– १. विद्येश्वरसंहिता, २. रुद्रसंहिता, ३. विनायकसंहिता, ४. उमासंहिता, ५. मातृसंहिता, ६. एकादशरुद्रसंहिता, ७. कैलाससंहिता, ८. शतरुद्रसंहिता, ९. कोटिरुद्रसंहिता, १०. सहस्रकोटिरुद्रसंहिता, ११. वायवीयसंहिता, १२. धर्मसंहिता ।

तासां श्लोकसंख्या–

| | | | |
|---|---|---|---|
| १. | विद्येश्वरसंहिता | – | दशसहस्राणि |
| २. | रुद्रसंहिता | – | दशसहस्राणि |
| ३. | विनायकसंहिता | – | दशसहस्राणि |
| ४. | उमासंहिता | – | अष्टसहस्राणि |
| ५. | मातृसंहिता | – | अष्टसहस्राणि |

| | | | |
|---|---|---|---|
| ६. | एकादशरुद्रसंहिता | – | त्रयोदशसहस्राणि |
| ७. | कैलाससंहिता | – | षट्सहस्राणि |
| ८. | शतरुद्रसंहिता | – | त्रिसहस्राणि |
| ९. | कोटिरुद्रसंहिता | – | नवसहस्राणि |
| १०. | सहस्रकोटिरुद्रसंहिता | – | दशसहस्राणि |
| ११. | वायवीयसंहिता | – | दशसहस्राणि |
| १२. | धर्मसंहिता | – | द्वादशसहस्राणि |

तदेवं लक्षसंख्यकश्लोकयुक्तं शिवपुराणं व्यासदेवः संक्षिप्य चतुर्विंशत्सहस्रकं सप्तसंहितं चकार । ताः सप्तसंहिताः शिवपुराणे विद्येश्वरसंहितायां यथा–

विद्येश्वराख्या तत्राद्या रौद्री ज्ञेया द्वितीयका ।
तृतीया शतरुद्राख्या कोटिरुद्रा चतुर्थिका ।।
पञ्चमी चैव चोमाख्या षष्ठी कैलाससंज्ञिका ।
सप्तमी वायवीयाख्या सप्तैवं संहिता मताः ।।

सप्तसंहितानां नामानि—

१. विद्येश्वरसंहिता ।
२. रुद्रसंहिता ।
३. शतरुद्रसंहिता ।
४. कोटिरुद्रसंहिता ।
५. उमासंहिता ।
६. कैलाससंहिता ।
७. वायवीयसंहिता ।

**बोधप्रश्नः—**

१. मातृसंहिता कति श्लोकात्मिका ?

२. सृष्ट्यादौ शिवपुराणं कः कथितवान् ?

**शिवपुराणस्य श्रवणविधिः वक्तुः लक्षणञ्च—**

शिवपुराणस्य श्रवणविधिः शौनकं प्रति सूतेन वर्ण्यते यत् शिवपुराणस्य कथायाः निर्विघ्नपरिसमाप्तये सर्वप्रथमदैवज्ञम् आहूय तं सन्तोष्य मुहूर्त्तं शोधयेत् । शिवपुराणस्य कथा श्रवणार्थं देशे देशे प्रयत्नेन वार्त्ता प्रेषणीया । पुनश्च शिव-कीर्त्तन-श्रवणोत्सुकानाम् आगतानां शाम्भवः भक्तानाम् आदरसत्कारञ्च कुर्यात् ।

शिवालये तीर्थे वने अथवा गृहे शिवपुराणस्य कथावाचनं कुर्यात् । प्रथमतः भूमेः संशोधनं कृत्वा लेपनं तथा धातुमण्डनञ्च कृत्वा पुराणस्थलं रचयेत् । विशालमण्डपं कृत्वा तत् कदलीस्तम्भैः पत्रपुष्पैश्च मण्डयेत् । चतुर्दिक्षु ध्वजारोपं सुशोभनं च कारयेत् । परात्मनः शङ्करस्य तथा वक्तुश्च दिव्यासनं कल्पयेत् । श्रोतृणां सुस्थलानि च यथार्हतः कल्पनीयानि । वक्ता उदङ्मुखः तथा श्रोता प्राग्वदनो भवेत् । व्यासासन-समारुढः पौराणिको द्विजः प्रसङ्गस्य असमाप्तौ कमपि न नमस्कुर्यात् । पुराणज्ञः सदा सुकृतार्थिभिः वन्द्यः पूज्यश्च । पुराणज्ञे नीचबुद्धिं न कुर्वीत । साधुः, कारुण्यवान्, दक्षः, विगतमत्सरः, शुचिर्दक्ष, पुराणज्ञः, वाग्मी च इमां पुण्यकथां वदेत् । आसूर्योदयमारभ्य सार्द्धत्रिप्रहरान्तकं शिवपुराणस्य कथा वाच्या । कुटिलवृत्तीनामग्रे कथां नैव वदेत् । दुर्जनसमाकीर्णे दस्युसमावृते च देशे अथवा धूर्तसदने इमां पुण्यकथां न वदेत् । मध्याह्ने मुहूर्त्तकं मलमूत्रोत्सर्जनार्थं कथाविरामः कर्त्तव्यः। पुराणवत्ता व्रतदिनात् प्रागेव दिने क्षौरं कार्यम् । नित्यकर्म संक्षेपतः कार्यम् । वक्तुः पार्श्वे सहायतार्थम् अन्यः लोकबोधनतत्परः पण्डितः स्थाप्यः । पुराणकथायाः निर्विघ्नपरिसमाप्त्यर्थं कथाधीशं शिवं गणनाथं पुराणपुस्तकञ्च पूजयेत् ।

**श्रोतुः लक्षणम्—**

शिवपुराणस्य श्रोता सुधीः, शुद्धः, शुद्धचित्तः, प्रसन्नधीः भवेत् । अनेककर्मविभ्रान्तः कामादिषड्विकारवान्, स्त्रैणः, पाखण्डवादी वक्ता, श्रोता च पुण्यभाक् न भवेत् । श्रद्धाभक्तिसमन्विताः स्थिराः अव्यग्राः शुचयः श्रोतारः पुण्यभागिनः भवन्ति । ये अभक्ता इमां कथां शृण्वन्ति तेषां श्रवणजं फलं, नास्ति अपि तु ते दुःखं प्राप्नुवन्ति । कथ्यमानायां कथायां ये नरा अन्यत्र गच्छन्ति तेषां दारादिसम्पदः प्रणश्यन्ति । ये उष्णीषमस्तका इमां कथां शृण्वन्ति तेषां पापिनां कुलदूषकाः पुत्राः जायन्ते । ये ताम्बूलभक्षण-पूर्वकं पुराणकथां शृण्वन्ति यमालये ते स्वविष्ठां स्वादन्ति । ये तुङ्गासनारूढाः नराः कथां शृण्वन्ति ते नरकान् भुक्त्वा ततः काकाः भवन्ति । ये वीराद्यासनारूढा इमां शुभां कथां शृण्वन्ति ते सर्वान् नरकान् भुक्त्वा विषवृक्षाः भवन्ति । वक्तारम् असम्प्रणम्य ये नराः कथां शृण्वन्ति ते नरकान् भुक्त्वा अर्जुनपादपाः भवन्ति । शयाना ये इमां कथां शृण्वन्ति ते नरकभोगं कृत्वा तदन्ते अजगरादयो भवन्ति । ये श्रोतारो वक्तारं तथा सुपावनीं कथां निन्दन्ति ते शुनका भवन्ति तथा जन्मशतं दुःखभोगं कुर्वन्ति ।

**बोधप्रश्नः—**

१. के वेरे पूजयन्ते ?

२. कः लिङ्गे वेरे च पूज्यते ?

**शिवलिङ्गस्य तथा वेरस्य पूजनम्—**

श्रवणादि त्रिके मुक्तिसाधने अशक्तो जनः शङ्करस्य लिङ्गं (निष्कलम्) तथा वेरं (साकारस्वरूपं) संस्थाप्य नित्यम् अर्चयेत् । अनेन उपायेनापि संसारसागरं तरेत् । कपटरहितः सन् स्वशक्त्यानुसारं शिवलिङ्गोपरि द्रव्यं वहेत् । तथा च बेरं पूजयेत् । भक्त्या मण्डपं, गोपुरं, तीर्थं, मठं, नेत्रं तथोत्सवम् आयोजयेत् । वस्त्रम्, गन्धम्, माल्यम्, धूपम्, दीपं च भक्तितः सपर्ययेत् । तथा विविधान्नं व्यञ्जनैर्युक्तं नैवेद्यं च निवेदयेत् । राजोपचारवत् लिङ्गवेरयोः सर्वं धारयेत् । प्रदक्षिणां, नमस्कारं यथाशक्ति जपं, तथा आवाहनादि सर्गान्तं नित्यं सुभक्तितः कुर्यात् । इत्थं शङ्करदेवस्य लिङ्गं वेरं च भक्त्या सम्पूज्य भक्तः श्रवणादिकं हित्वाऽपि शिवप्रीत्या सिद्धिमेति ।

सर्वत्र देवतागणाः बेरमात्रे पूज्यन्ते ; परन्तु शिवः लिङ्गे बेरे च कथं सम्पूज्यते इति मुनीनां जिज्ञासां श्रुत्वा सूतः कथयति यत् एकमात्रः शिवो ब्रह्मरूपो निष्फलः परिकीर्त्तितः । रूपीत्वात् च सकलः कथ्यते । निष्कलत्वात् स निराकारलिङ्गस्वरूपः कथ्यते । सकलत्वात् तस्य साकारस्वरूपं प्रतिमारूपेण पूज्यते । सकलनिष्कलरूपत्वाद् परमेश्वरः शिवो ब्रह्मशब्दाभिधः । अतः लिङ्गे बेरे च जनैः स नित्यमभ्यर्च्यते । अब्रह्मत्वात् अन्येषां निष्कलत्वं नास्ति । अब्रह्मत्वात् जीवत्वाच्च अन्ये देवतागणाः निष्कले लिङ्गे नाराध्यन्ते । अत अन्येषां देवानां जीवत्वं शङ्करस्य च ब्रह्मत्वं सिद्ध्यति इति वेदनिश्चयः ।

**बोधप्रश्नः—**

१. कः ब्रह्मशब्दाभिधः ?

**साध्यसाधनसाधकतत्त्वम्—**

पुरा परतत्त्वस्य स्वरूपनिर्णयप्रसङ्गे षट्कुलीनानां मुनीनां मध्ये सुमहान् विवादोऽभूत्, परन्तु कोऽपि निर्णयो नाभूत् । कः पुमान् सर्वसत्त्वेभ्यः आद्यः पुराण इति निर्णयितुमसमर्थाः मुनयः ब्रह्माणमभिजग्मुः। तेषां जिज्ञासां ज्ञात्वा ब्रह्मा 'महेश्वरः' एव आद्यः पुराणः पुरुष इति अवोचत् । तद्यथा–

एष देवो महादेवः सर्वज्ञः जगदीश्वरः ।
अयं तु परया भक्त्या दृश्यते नान्यथा क्वचित् ।। (शि.पु. १.३.१२)

तस्य परमेश्वरस्य शिवस्य प्रसादार्थं भुवं गत्वा सहस्रवर्षं महायज्ञं कर्त्तुं ब्रह्मा तान् मुनीन् उपदिष्टवान् । तदा मुनयः साध्यसाधनसाधकतत्त्वं ज्ञातुम् इच्छितवन्तः । प्रसन्नो विधिः तेभ्यः तद् सर्वं विस्तृतरूपेण अप्रतिपादयत् । तेनोक्तं यत् शिवपदप्राप्तिरेव साध्यम्, तस्य शिवस्य पादसेवनञ्च साधनमस्ति । तथा च शिवस्य प्रसादात् योऽनित्यादिफलनिस्पृहः जनः तस्य सेवातत्परो भवति स एव साधकपदवाच्यः।

शिवपुराणे सिद्धिलाभार्थं बहुविधसाधनं साक्षादीशेन निरुपितं वर्त्तते । तद्यथा–

श्रोत्रेण श्रवणं तस्य वचसा कीर्त्तनं तथा ।
मनसा मननं तस्य महासाधनमुच्यते ।।
श्रोतव्यं कीर्त्तितव्यञ्च मन्तव्यञ्च महेश्वरः ।
इति श्रुतिप्रमाणं नः साधनेनाऽमुना परम् ।।

शिवभक्तेः साधकः आदौ गुरुमुखात् साध्यस्य तस्य परमेश्वरतत्त्वस्य श्रवणं कृत्वा तत्पश्चात् कीर्त्तनं मनसा मननं च संसाधयेत् । तेन सालोक्यादि क्रमात् शिवयोगस्य प्राप्तिः भवेत् । प्रथमतः सर्वाङ्गव्याधयः अनन्तरं सर्वानन्दश्च लीयेते । यद्यपि अभ्यासकाले तु एतद् क्लेशदायकं प्रतीयते परन्तु तद् पश्चादानन्दमङ्गलदायकञ्च भवति ।

**बोधप्रश्नः—**

१. शिवपुराणे सिद्धिलाभार्थं बहुविधसाधनं केन निरूपितम् ?

२. कः साधकपदवाच्यः ?

तस्य परतत्त्वस्य मननं, श्रवणं, कीर्त्तनञ्च कथं कुर्यात् ? इति मुनीनां जिज्ञासायाः समाधाने ब्रह्मदेवः कथितवान् यत् युक्त्या निरन्तरम् ईश्वरपूजनं, मनसा गुणरूपचरित्रचिन्तनं ममनमिति कथितम् । ईश्वरकृपयोपलब्धमिदं साधनं साधनेषु मुख्यमस्ति । परन्तु सदाशिवस्य प्रताप-गुण-रूप-

विलासनाम्नां वाचा स्तवनं कीर्त्तनं निगद्यते । तत्तु मध्यमसाधनमस्ति । येन केनापि कारणेन शिवमाहात्म्यपरकं क्वचित् शब्दपुञ्जं यदा श्रवणगोचरः भवति तथा च 'स्त्रीकेलिवत्' मनः यदा तस्मिन्साधने रमते, तत्तु श्रवणमिति पण्डिताः वदन्ति । सत्सङ्गमेन श्रवणं भवति, ततः पशुपतेः कीर्त्तनं, तदन्ते परमेश्वरशिवस्य कृपया तस्य मननं सम्भवति । शिवयोगसाधनस्य अयं भवति क्रमः ।

सनत्कुमारानुसारेण च मुक्तिकारणं त्रयसाधनम् एवमस्ति । यथा-- १. श्रवणम्, २. कीर्त्तनम्, ३. मननम् च । साक्षात् शिवः मुक्तिलाभाय त्रिकं (श्रवणं, कीर्त्तनं, मननं) साधनं साधयितुं सनत्कुमारम् उपदिष्टवान् । तद्यथा विद्येश्वरसंहितायां–

त्रिकं च साधनं मुक्तौ शिवेन मम भाषितम् ।
श्रवणादित्रिकं ब्रह्मन्, कुरुष्वेति मुहुर्मुहुः ।। (४/२०)

**बोधप्रश्नः—**

१. सनत्कुमारानुसारेण कानि मुक्तिसाधनानि ?

श्रवणादि त्रिके साधने अशक्तः जनः मुक्तिलाभाय शाङ्करं लिङ्गबेरं संस्थाप्य नित्यमभ्यर्च्य संसारसागरं तरेत् । यथा चोक्तं विद्येश्वरसंहितायाः चतुर्थाध्याये–

सिद्धिमेति शिवप्रीत्या हित्वाऽपि श्रवणादिकम् ।
लिङ्गबेरार्चनामात्रान् मुक्ताः पूर्वे महाजनाः ।। (५/७)

**बोधप्रश्नः—**

१. पूर्वे महाजनाः कथं मुक्ता अभवन् ?

**पारिभाषिकशब्दाः—**

सकलः - साकाररूपम् ।

निष्कलः - निराकाररूपम् ।

बेरम् - हस्तचरणादिसाकाररूपम् ।

## सारांशः

धर्मक्षेत्रे प्रयागे पुरा सत्यव्रतपरायणाः मुनयः महासत्रमाचरितवन्तः । महायज्ञं समाकर्ण्य व्यासदेवस्य पौराणिकः शिष्यः सूतः तत्राजगाम । तं दृष्ट्वा प्रहृष्टाः मुनयः तस्य सत्कारं कृत्वा घोरे कलियुगे नष्टबुद्धीनां स्वधर्मत्यागशीलिनां नराणां मुक्त्युपायमपृच्छन् । तदा सूतदेवः परमेश्वरशिवस्य माहात्म्यसम्बलितं शिवपुराणं कथयामास । शिवपुराणस्य सम्पूर्णं माहात्म्यं, वक्तुः श्रोतुश्च लक्षणं तथा शिवपुराणे

संहिताभेद: एतत्सर्वं वर्णयित्वा सूतदेव: साध्यसाधनसाधकतत्त्वमाध्यमेन मनुष्यस्य कृते शिवपदप्राप्तिरेव साध्यं, तस्मिन् सिद्धिलाभनिमित्तं श्रवणकीर्त्तनादय: साधनमिति निरूपितवान् । पुनश्च साधकस्य संज्ञा तेन एवं निरूपिता यत्, फलनिस्पृह:, तस्य शिवस्य निरन्तरसेवातत्पर: जन: साधकपदवाच्य: नान्य: इति ।

***सहायकग्रन्था:-***

१. शिवपुराणम् (टीकासहितम्)- आचार्य पं. शिवदत्तशास्त्री
सावित्री ठाकुर प्रकाशन, चौराहा, वाराणसी ।

२. शिवपुराणम्- नागप्रकाशनम्, दिल्ली ।

३. शिवतत्त्वविमर्श:- डॉ. मिनतिरथ, सदाशिवपरिसर:,
पुरी, (ओडिशा) ।

## आदर्शप्रश्ना:

**लघूत्तरीयप्रश्ना:-**

१. शिवपुराणस्य श्रवणविधि: ।

२. शिवपुराणस्य वक्तु:लक्षणम् ।

३. शिवपुराणस्य श्रवणव्रतीनां नियम: ।

**विश्लेषणात्मका: प्रश्ना:—**

१. शिवपुराणे प्रदत्तान् संहिताभेदान् लिखत ।

२. यज्ञदर्शनार्थमागताय सूताय मुनिप्रश्नं निरूपयत ।

३. शिवलिङ्गस्य तथा बेरस्य पूजाविधानं लिखत ।

**निबन्धात्मका: प्रश्ना:—**

१. शिवपुराणस्य माहात्म्यं विशदयत ।

२. कलिदोषदूषितान् वर्णाश्रमधर्मान् प्रतिपादयत ।

३. ब्रह्मणा प्रोक्तं साध्यसाधनसाधकतत्त्वं लिखत ।

**एकाङ्कप्रश्ना:—**

१. सृष्ट्यादौ शिवपुराणं केन कथितमभूत् ?

२. पुरा शिवपुराणं कतिसंहिताविशिष्टमासीत् ?

३. सप्तसंहितानां श्लोकसंख्या कति ?

४. कस्मिन् नीचबुद्धिं न कुर्वीत ?

५. केषां श्रवणजं फलं नास्ति ?

६. रूपित्वात् शिवः किं कथ्यते ?

७. धर्मरहिताः नराः कलौ किं लोपयिष्यन्ति ?

८. कः साध्यसाधनसाधकतत्त्वम् अज प्रतिपादयत् ?

९. किं साध्यम् ?

१०. कः पुमान् सर्वसत्त्वेभ्यः पुराणः ?

११. परतत्त्वं ज्ञातुं मुनयः कमभिजग्मुः ?

१२. अखिलां पुराणविद्यां सूतः कस्मात् अधीतवान् ?

**उत्तराणि—**

१. परमेश्वरशिवेन, २. द्वादश, ३. चतुर्विंशतिसहस्रम्, ४. पौराणिके, ५. अभक्तानां, नराधमानां, ६. सकलः, ७. वर्णधर्मं, ८. ब्रह्मदेवः, ९. शिवपदप्राप्तिः, १०. परमेश्वरः शिवः, ११. ब्रह्माणं, १२. व्यासदेवात् ।

–०–

## सप्तमोऽंशः

**प्रस्तावना—**

विद्येश्वरसंहितायाः द्वितीयेऽस्मिन् अंशे भगवतः शिवस्य माहात्म्यं ब्रह्मविष्णुभ्यामधिक-मिति प्रतिपादितं विद्यते । पुनश्च अत्रापि तेषु त्रिदेवेषु साम्यमपि प्रदर्शितं विद्यते । शिवरात्रितत्त्वं तथा माहात्म्यम् अस्य पुराणस्य निजस्ववैशिष्ट्यं विद्यते । शिवरात्रितत्त्वम् अत्र यथा निरूपितम् अन्यत्र तथा नोपलभ्यते । ओंकारस्वरूपं तथा जपविधानम् अत्र सुष्ठुरूपेण प्रतिपादितमस्ति । पञ्चकृत्यस्य विवेचनं शैवशास्त्रेषु विद्येश्वरसंहितायाः महत्त्वं प्रतिष्ठाञ्च बहुगुणितं करोति ।

**उद्देश्यम्—**

प्रियपाठकाः, वयम् अस्मिन् अंशे एतान् विन्दून् आलोचयिष्यामः-

- विधिविष्णुर्मध्ये युद्धम् ।
- केतकपुष्पस्य मिथ्यासाक्ष्यप्रदानम् ।
- ब्रह्मण अपूज्यत्वम् ।
- शिवरात्रितत्त्वं माहात्म्यञ्च ।
- पञ्चकृत्यस्य लक्षणम् ।
- ओंकारस्वरूपम् ।
- ओंकार जपविधानम् ।

– ० –

**ब्रह्मविष्णोः युद्धम्—**

पुरा कदाचित् योगीन्द्रः विषधरासनः विष्णुः स्वानुगैः संवृतः सन् रमया साकं शेषशय्यायां शयनं चकार । यदृच्छया तत्र ब्रह्मविदां वरो ब्रह्मदेव आगतवान् । सर्पशय्यायां शयानं विष्णुं दृष्ट्वा स कोपेन अपृच्छत् यत् 'त्वं कः ? मामपि दृष्ट्वा दृप्तवत् पुरुषवच्छेषे ? उत्तिष्ठ वत्स ! इहागतं तव नाथं मां पश्य । आगतं गुरुमाराध्यं दृष्ट्वा यो मूढः दृप्तवच्चरेत् तस्य मूढस्य द्रोहिणः प्रायश्चित्तं विधीयते ।

ब्रह्मण एतादृशं वचनं श्रुत्वा विष्णोः मनसि क्रोधोऽभूत् । परन्तु शान्तो भूत्वा स ब्रह्मणः स्वागतं चकार । पुनश्च तेनोक्तं यत् कथं व्यग्रवत् भवसि ? इदं सम्पूर्णं जगत् मत्स्थम् अस्ति, चौरवत् कथं त्वदीयमिति वदसि ? त्वं मन्नाभिकमलाज्जातः मदीयः पुत्रोऽसि, त्वं वृथा भाषसे ।

एवं तयोर्मध्ये विवादोऽभूत् । परस्परं हन्तुकामौ तौ समरोद्यमं चक्रतुः । हंस-पक्षीन्द्रवाहनौ तौ तदा मिथो युयुधिरे । तावत् विमानगतयः सर्वे देवाः महाद्भुतं तं समरं द्रष्टुं तत्र आगतवन्तः । अथ क्रुद्धो विधिः विष्णोः उरसि दुःसहान् बाणान् मुमोच । क्रुद्धोऽपि गरुडवाहनः ब्रह्मवक्षसि विविधानि अस्त्राणि मुमोच । व्यसनकर्शितः विष्णुः ब्रह्मण उपरि माहेश्वरास्त्रं संदधे । सोऽपि ब्रह्म विष्णुवक्षसि घोरं पाशुपतास्त्रं संदधे । तयोर्मध्ये एतादृशं भयकरं युद्धं दृष्ट्वा विषण्णाः भृशमाकुलाः देवाः कैलासशिखरं चन्द्रशेखरसमीपं जग्मुः । प्रणवाकारं परमेश्वरं शिवं दृष्ट्वा ते अमराः तं प्रणेमुः । सर्वतो स्वगणैः जुष्टम् उमया सह मणिमयमण्डपे विराजितं देवपुङ्गवं सर्वे देवा दण्डवत् दूरतः नमश्चक्रुः । तान् देवान् विलोक्य स महादेवः तान् देवान् संह्लादयन् समीपे चाह्वयद्, मङ्गलसमाचारमप्यमपृच्छत् । पुनश्च हरिधात्रोः युद्धविषयं समुत्थाप्य स्वगणैः सार्द्धं युद्धस्थलं गन्तुम् उद्यतोऽपि अभवत् । अम्बिकया सार्द्धं पशुपतिः सुसज्जितं रथमारुह्य युद्धक्षेत्रं जगाम । इन्द्राद्याः सर्वे सुराः तमनु ययुः । तत्र तयोर्मध्ये प्रलयकारकं महायुद्धं निरीक्ष्य तन्मध्यस्थले स निष्कलः शिवो विभीषणाकृतिमहानलस्तम्भः बभूव । अस्त्रशान्तिकरं शुभं तदद्भुताकारम् अग्निस्तम्भं दृष्ट्वा तौ ब्रह्माच्युतौ विस्मितौ बभूवतुः । अतीन्द्रियस्य अग्निरूपस्य तस्य स्तम्भस्य ऊर्ध्वम् अधश्च परीक्षार्थं तौ सत्वरं गतवन्तौ । सूकरतनुं धृत्वा विष्णुः तस्य स्तम्भस्य मूलं द्रष्टुं पातालं गतवान् । हंसरूपं गृहीत्वा ब्रह्मदेवः आकाशे गतवान् । पातालनिलयं ततः दूरतरमपि गत्वा सूकरहरिः अनलवर्चसः स्तम्भस्य संस्थानं नापश्यत । श्रान्तः सन् स रणक्षेत्रमागतवान्।

**बोधप्रश्नः—**

१. हंसपक्षीन्द्रवाहनौ कौ ?

**केतकपुष्पस्य मिथ्यासाक्ष्यप्रदानम्—**

व्योम्ना गच्छन् विधिः किञ्चिद् विच्युतमद्भुतं केतकीपुष्पं ददर्श । बहुवर्षच्युतं तथापि अतिसौरभ्यमम्लानं तत् केतकीपुष्पं परमेश्वरस्य शिरः कम्पनात् चलितमभूत् । विधिं दृष्ट्वा तत् पुष्पमेवमकथयत् यत्- 'त्वं स्तम्भस्यान्तं द्रष्टुं न समर्थः, अस्य अन्तं मया न दृष्टम्, अतोऽन्तदर्शने आशां जहि । तदा ब्रह्मदेव मिथ्यासाक्ष्यप्रदानार्थं केतकं निवेदितवान् । यतः आपत्काले मिथ्याभाषणं पापाय नोपकल्पते । तद्यथा विद्येश्वरसंहितायां-

"असत्यमपि शस्तं स्यादापदीत्यनुशासनम् ।" (शि.पु. १/७/२५)

**बोधप्रश्नः—**

१. ज्योतिर्मयः स्तम्भः कुत्राविर्बभूव ?

२. केतकपुष्पं कथं चलितोऽभूत् ?

ततो ब्रह्मा तत्रागत्य प्रणष्टहर्षं विष्णुं दृष्ट्वा तेन स्तम्भाग्रं समुदीक्षितमिति उक्तवान् । ब्रह्मणः कथनानुसारं केतकपुष्पमपि मिथ्यासाक्ष्यमददात् । ब्रह्मणः वचनं सत्यमिति चिन्तयन् विष्णुः षोडशोपचारैः तस्य पूजनं चकार । तदा शठं विधिं प्रहर्त्तुं स ईश्वरः अग्निलिङ्गतः साकृतिः बभूव । समुत्थितं सदाशिवं दृष्ट्वा प्रकम्पपाणिः ब्रह्मदेवः तत्पदं परिगृह्य तं क्षन्तुं निवेदितवान् । परन्तु कुपितः परमेश्वरः शिवः प्रथमतः केतकं स्वपूजायाः बहिष्कृतं चकार ।

**ब्रह्मणोऽपूज्यत्वम्—**

ततः प्रसन्नः परमेश्वरः शिवः सत्यवादिनो भगवतः विष्णोः प्रशंसां कृत्वा तस्मै साम्यमददात्। पुनश्च तस्य पूजनार्थं स्थानं उत्सवं च कल्पयामास । तदनन्तरं महादेवः भैरवाख्यं कञ्चिदद्भुतं पुरुषं भ्रुवोर्मध्यात् ससर्ज । ब्रह्मदर्पजिघांसया शिवः विधेः शिरः तिग्मेन खड्गेन च्छेतुं भैरवम् आज्ञप्तवान्। तदा भैरवः एकेन करेण असत्यवादिनः ब्रह्मणः पञ्चमं शिरो धृत्वा छेदयामास । तत खड्गमुद्यम्य यदा तस्य शिरांसि निहन्तुमुद्यतोऽभूत् तदा अच्युतः शिवस्य पादपल्लवं गृहीत्वा विधये क्षमां प्रदातुम् आकुलनिवेदनं चकार । अच्युतेन प्रार्थित ईश्वरः तुष्टः सन् भैरवं ब्रह्मदण्डतः निवर्तयामास । पुनश्च शठमीशत्वमास्थितस्य ब्रह्मणः स्थानं पूजोत्सवादिकं च लाके निषेधयामास । भीतः ब्रह्म सदाशिवं प्रसादयितुं स्तुतिं चकार । तेन प्रसन्नः परमेश्वरः वैतानिकेषु गृहेषु यज्ञेषु च गुरुरूपेण तम् अधितिष्ठं चकार । तं विना यज्ञस्य निष्फलत्वं च निरूपयामास । पुनश्च केतकस्यानुरोधेन करुणया शिवः मदीयास्त्वां धरिष्यन्ति, वितानव्याजेन त्वं ममोपरि भविष्यसि' इति तस्मै पुष्पाय वरं दत्तवान् ।

**बोधप्रश्नाः—**

१. कयोर्मध्ये विवादोऽभूत् ?

२. कः मिथ्यासाक्ष्यमददात् ?

**शिवरात्रितत्त्वम्—**

पुरा कदाचित् सर्वश्रेष्ठत्वप्रतिपादनार्थं विधिविष्णुर्मध्ये विवादोऽभूत् । ततः तयोर्मध्ये तुमुलसंग्रामोऽपि बभूव । तयो एतादृशं संग्रामं दृष्ट्वा सर्वत्र महान् हाहाकारोऽभूत् भयभीताः देवाः परमेश्वरसदाशिवस्य शरणापन्ना अभवन् । कृपामयः शिवः शान्त्वनावाक्यैः तान् शान्त्वयामास ।

ततः पशुपतिः शिवो अम्बिकया साकं रणस्थलं जगाम । रणक्षेत्रे परस्परं हन्तुकामयोः युद्धनिरतयोः तयोर्मध्ये सहसा भीषणाकृतिमहानलस्तम्भ आविर्बभूव । अस्त्रशान्तिकरं तमद्भुताकारं तेजोमयं स्तम्भं दृष्ट्वा ब्रह्माच्युतौ चकितौ बभूवतुः । अनलसन्निभस्य तस्य स्तम्भस्य ऊर्ध्वम् अधश्च परीक्षार्थं तौ सत्वरं गतवन्तौ सुकरतनुं धृत्वा विष्णुः पाताले तथा हंसतनुं धारयित्वा ब्रह्मा ऊर्ध्वे जग्मतुः । पातालात् दूरमपि गत्वा विष्णुः लिङ्गस्य मूलं नापश्यत । श्रान्तः सन् स रणक्षेत्रे प्रत्यावर्त्तनं चकार । ऊर्ध्वं गत्वा ब्रह्मा आपतन्तं केतकं पुष्पं दृष्ट्वा मिथ्यासाक्ष्यप्रदानार्थं तं प्रेरयामास । ततः तौ रणक्षेत्रे प्रत्यावर्त्तनं चक्रतुः । आह्लादितो ब्रह्मदेवः स्तम्भस्य मूलं तेन दृष्टमिति कथितवान् । केतकं पुष्पमपि मिथ्यासाक्ष्यमददात्। तदानीमेव भगवान् सदाशिवः तत्राविर्भूय सत्यशीलस्य विष्णोः प्रशंसा कृत्वा तस्मै साम्यमददात् । पुनश्च असत्यवादिनः ब्रह्मणः पञ्चमं शिरः भैरवहस्तेन छेदयामास, लोके ब्रह्मणः पूजां निषेधयामास । केतकं च स्वपूजायाः बहिष्कृतं चकार । पुनश्च कृपां कृत्वा वैतानिकेषु यज्ञेषु गृहेषु च ब्रह्मणः स्थानं कल्पयामास । तथा च केतकस्यापि स्थानं कल्पयामास ।

एवं विधिमाधवौ केतकञ्चानुगृह्य देवैरभिष्टुतः सर्वदेवेश्वरः सभामध्ये विरराज । तं पूज्यं वरासने संस्थाप्य पुण्यैः पुरुषवस्तुभिः तौ पूजयामासतुः । तानि एव पुरुषवस्तुनि ज्ञेयानि यानि प्रकृतिजानि दीर्घाल्पकालिकानि च सन्ति । हार-केयूर-नूपुर-किरीटमणि-कुण्डलैः यज्ञोसूत्रोत्तरीय-क्षौम-माल्याङ्गुलीयकैः, पुष्प-ताम्बुल-चन्दनाऽगुरुलेपनैः, धूप-दीप-सितच्छत्र-व्यजन-ध्वज-चामरैः, अन्नैर्दिव्योपहारैः वाङ्मनोऽतीतवैभवैश्च पतियोग्यवस्तुभिः तौ विधिअच्युतौ पशुपतिमर्चयामासतुः । ब्रह्मविष्णुभ्यामर्चितः प्रसन्न । शङ्करः नम्रौ तौ प्राह यत्-

तुष्टोऽहमद्य वां वत्सौ पूजयाऽस्मिन् महादिने ।
दिनमेतत् ततः पुण्यं भविष्यति महत्तरम् ।
शिवरात्रिरिति ख्याता तिथिरेषा मम प्रिया ।। (शि.पु. १/९/९-१०)

**बोधप्रश्नः—**

१. शिवः केनरूपेण आविर्बभूव ?

२. कानि पुरुषवस्तुनि ?

**शिवरात्रिमाहात्म्यम्—**

शिववचनानुसारं यः शिवरात्र्यां तस्य लिङ्गबेरयोः पूजां करोति स ब्रह्मपदं लभते । शिवरात्रावहोरात्रं निराहारो जितेन्द्रियोऽवञ्चकः यथाबलं यथान्यायं शिवं योऽर्चयेत् स निरन्तरमेकवर्षपूजायाः फलं लभते । शिवरात्रौ शिवपूजनेन धर्मोऽभिवर्द्धते । शिवरात्रिः भगवतः शिवस्य प्रतिष्ठायाः उत्सवस्य च शुभदिनमस्ति ।

पुरा यस्मिन् दिने स्तम्भरूपेण परमेश्वरस्य शिवस्याविर्भावोऽभूत् तद् मार्गशीर्षे आद्रानक्षत्रस्य उदयकालः आसीत् । अतः मार्गशीर्षे आद्रानक्षत्रे ये पार्वत्या साकं परमेश्वरस्य दर्शनं कुर्वन्ति, ते शिवस्य कृते कार्त्तिकेयादपि प्रियाः भवन्ति । तस्मिन् शुभे दिने उमासहितपरमेश्वरशिवस्य लिङ्गरूपस्य अथवा बेरस्य यः दर्शनं करोति, अर्चनं करोति तस्य पुण्यफलं वाचा वर्णयितुं न कोऽपि समर्थः ।

यस्मिन् स्थले महादेवः तेजोमयस्तम्भरूपेण आविर्बभूव तत्स्थलं लिङ्गस्थानमिति ख्यातम् । आद्यन्तरहितं तल्लिङ्गं जगतां पूजनार्थं दर्शनार्थं च शिवेच्छया अणुमात्रं क्षुद्रं बभूव । अनलाचलसङ्काशं तद् लिङ्गं यत्रोत्थितोमभूत् तद् स्थानं अरुणाचलमिति स्मृतमभूत् । तस्मिन् स्थाने निवासेन मरणेन च जन्तूनां मुक्तिलाभो भवेत् । अत्र दत्तं हुतं जप्तं सर्वं कोटिगुणं भवेत् । अतः स्वयं शिवेन क्षेत्रस्यास्य महत्त्वं निरूपितम्–

मत्क्षेत्रादपि सर्वस्मात् क्षेत्रमेतत् महत्तरम् ।
अत्र संस्मृतिमात्रेण मुक्तिर्भवति देहिनाम् ।। (शि.पु. १/९/१४)

तस्मात् अत्यन्तशोभनमिदं क्षेत्रं महत्तरमस्ति । सर्वकल्याणसम्पूर्णं सर्वमुक्तिकरं शुभञ्चास्ति । अत्र शिवलिङ्गार्च्चनात् सारुप्यादि मुक्तिलाभो भवति । सकलमनोरथोऽपि पूर्णो भवति ।

**बोधप्रश्नः—**

१. के शिवस्यकृते कार्त्तिकेयादपि प्रियाः भवन्ति ?

२. कथं ज्योतिर्लिङ्गम् अणुमात्रं क्षुद्रं बभूव ?

**पञ्चकृत्यस्य लक्षणम्—**

सृष्टिः, स्थितिः, संहारः, तिरोभावः, अनुग्रहश्च एते पञ्च शिवस्य पञ्चकृत्यानि कथितानि सन्ति । संसारस्यारम्भः 'सर्गः' तत्प्रतिष्ठा 'स्थितिः' तस्य मर्दनं 'संहारः' तदुत्क्रमः 'तिरोभावः' तन्मोक्ष 'अनुग्रहः' कथ्यते । सर्गादि यच्चतुष्कृत्यं तद् संसारपरिजृम्भकमस्ति । पञ्चमम् अनुग्रहकृत्यं संसारात् मुक्तिहेतुकमस्ति । पञ्चकृत्यानि विद्वद्भिः पञ्चमहाभूतेषु दृश्यन्ते । भूमौ सृष्टिः, तोये स्थितिः पावके संहारः, अनिले तिरोभावः, तथा आकाशे अनुग्रहः, सूरिभिः परिलक्ष्यन्ते । धरण्या सर्वं सृज्यते, अद्भिः सर्वं प्रवर्द्धते, तेजसा अर्द्यते, वायुना सर्वमपनीयते तथा व्योम्ना चानुगृह्यते । इदं पञ्चकृत्यं वोढुं शिवस्य मुखपञ्चकमस्ति । चतुर्दिक्षु चतुर्वक्त्रं तन्मध्ये च पञ्चमं मुखं तिष्ठति । सृष्टिं तथा स्थितिं ब्रह्माच्युतौ कुरुतः । रुद्रः तथा महेशः संहारस्य तथा तिरोभावस्य कर्त्तारौ स्तः । परन्तु अनुग्रहस्य कोऽपि कर्त्ता नास्ति ।

**ओंकारस्वरूपम्—**

ऊरुमङ्गलमोंकारमन्त्रः परमेश्वरशिवस्य प्रथममुखात् उत्पन्नोऽभूत् । शिवात्मकोऽयं मन्त्रः प्रणवस्य वाचकः । तस्योत्तरात् मुखात् अकारः, पश्चिममुखात् उकारः, दक्षिणमुखात् मकारः, पूर्वमुखात् विन्दुः, तथा मध्यमुखात् नादः प्रादुर्बभूव । एवं पञ्चमुखादुद्भुताः एते मिलित्वा ओमित्येकाक्षरं ब्रह्म बभूवतुः ।

वेदात् सम्भूतमिदं नामरूपात्मकं द्विधा विभक्तं जगत् एतेन मन्त्रेण व्याप्तमस्ति । मन्त्रोऽयं शिवस्य शक्त्याश्च बोधकोऽस्ति । अस्मात् ओंकारात् सकलस्य बोधकम् अकारादिक्रमानुसारं पञ्चाक्षरं जज्ञे । यथा अकारात् 'नकारः', उकारात् 'मकारः' मकारात् 'शि'अक्षरः, विन्दोः 'वा'अक्षरः, नादात् 'य' अक्षरः यथाक्रमेण प्रकटितोऽभूत् । अस्मात् पञ्चाक्षरात् पञ्चमातृकाः (अ,इ,उ,ऋ,लृ) समुद्भुताः अभूवन् । ताः पञ्चमातृकाः प्रधानम्, तथा प्रधानात् चतुर्मुखः ब्रह्म अजायत । ब्रह्मणः

चतुर्मुखात् त्रिपादगायत्री समजायत । ततः सर्वे वेदाः तथा वेदेभ्यः मन्त्रकोऽयं जजिरे । तथा तैः मन्त्रैः देवेभ्यः सिद्धिप्राप्तिः भवेत् । अनेन मन्त्रकन्देन भोगो मोक्षश्च सिद्ध्यति । सकलाः मन्त्रराज साक्षात् भोगप्रदाः शुभप्रदायकाश्च सन्ति ।

**बोधप्रश्नः—**

१. शिवस्य प्रथममुखात् कः मन्त्र उत्पन्नोऽभूत् ?

२. शिवस्योत्तरमुखात् कः प्रादुर्बभूव ?

**ओंकारजपविधानम्—**

दिव्यं प्रणवमन्त्रं यः जपति तस्य सुस्थिरं ज्ञानं, शाश्वतं भाग्यं, सर्वञ्च प्राप्तं भवति । आद्रायां चतुर्दश्याञ्च तज्जाप्यं त्वक्षयं भवेत् । सूर्यगत्या महाद्रायाम् एकः जपः कोटिगुणः भवेत् । पुनर्वसोः आदिमः भागः तथा मृगशीर्षान्तिमो भागः पूजा–होमादितर्पणे आद्रासमफलदायकः ज्ञेयम् । तदा प्रभाते सन्ध्याकाले च शिवदर्शनं सौभाग्यप्रदायकं भवति । निशीथव्यापिनी, प्रदोषव्यापिनी तथा च परव्यापिनी चतुर्दशी प्रणवजपाय प्रशस्यते । यद्यपि शिवस्य लिङ्गं बेरं तुल्यमस्ति तथापि यजतां कृते लिङ्गमुत्तममस्ति । तस्मात् मुमुक्षुभिः बेरादपि लिङ्गं परं पूजनीयमस्ति । लिङ्गमोंकारमन्त्रेण तथा बेरं पञ्चाक्षरेण मन्त्रेण पूजयेत् । स्वयमेव सद्द्रव्यैः लिङ्गं प्रतिष्ठाप्य सूपचारैः यःतं पूजयति तस्य कृते शिवपदं सुलभं भवेत् ।

**पारिभाषिकशब्दाः—**

| | | |
|---|---|---|
| कश्मलं | – | पापम् |
| स्त्रक् | – | माला |
| पौरुषं | – | प्राकृतम् |
| मर्दनं | – | संहारः |

**सारांशः**

शिवपुराणस्य विद्येश्वरसंहिताया अस्मिन् अंशे ब्रह्मविष्णोः शिवस्य अधिकं महत्त्वं प्रदर्शितमस्ति । पुरा श्रेष्ठत्वप्रतिपादनार्थं विधिविष्णोः मध्ये युद्धमभूत् । तयाः विपुलं संग्रामं दृष्ट्वा शिवः तयोर्मध्ये स्तम्भरूपेण अवतरितोऽभूत् । स्तम्भस्यान्तं द्रष्टुं ब्रह्मा आकाशे तथा अधः द्रष्टुं विधिः पाताले गतवन्तौ । गत्वा तौ विफलौ अभवताम् । परन्तु ब्रह्म स्तम्भस्यान्तं मया दृष्टमिति मिथ्या कथितवान् । केतकमपि मिथ्यासाक्ष्यमददात् । तदा स्वरूपं धृत्वा आविर्भूय शिवः भैरवरूपेण ब्रह्मणः पञ्चमं मस्तकं नखाग्रेण जहार । पुनश्च तम् अपूज्यं चकार । केतकं स्वपूजायाः बहिष्कारयामास । ततः सर्वे मिलित्वा शिवस्य पूजां चक्रुः । प्रीतः शिवः विष्णवे स्वसाम्यमददात् । यत्र शिवाविर्भावोऽभूत् तत्स्थानं लिङ्गस्थानमिति ख्यातं बभूव । सा च तिथिः शिवरात्रिरिति ख्याता बभूव । शिवरात्रावहोरात्रं निराहारो जितेन्द्रियः सन् यः शिवस्य लिङ्गबेरयोः पूजां करोति तस्य अतुलं फललाभं भवति । ओंकारमन्त्रेण लिङ्गं, पञ्चाक्षरमन्त्रेण बेरं पूजयेत् ।

**आदर्शप्रश्नाः**

**लघूत्तरीयाः प्रश्नाः—**

१. केतकस्य मिथ्यासाक्ष्यम् ।

२. पञ्चकृत्यस्य लक्षणम् ।

३. ओंकार जपम् ।

**विश्लेषणात्मकाः प्रश्नाः—**

१. ब्रह्मणोऽपूज्यत्वं लिखत ।

२. ओंकारस्वरूपं प्रतिपादयत ।

३. शिवरात्र्याः माहात्म्यं निरूपयत ।

४. शिवपूजायाः केतकस्य बहिष्कारं निर्दिशत ।

**निबन्धात्मकः प्रश्नः—**

१. विधि–अच्युतयोः मध्ये विवादस्य कारणं निर्दिश्य तयोः युद्धं वर्णयत ।

२. शिवरात्र्या तत्त्वं तथा महत्त्वं प्रतिपादयत ।

**एकाङ्कप्रश्नाः—**

१. विषधरासनः कः ?

२. देवजातयः कथं समाजग्मु ?

३. विष्णुः ब्रह्मणोपरि किमस्त्रं संदधे ?

४. अग्निलिङ्गतः कः साकृतिः बभूव ?

५. मिथ्यासाक्ष्यं कोऽददात् ?

६. भैरवः कः ? स कस्य शिरच्छेदं चकार ?

७. शिवः कस्मै स्वसाम्यमददात् ?

८. केतकं के स्वपार्श्वादन्यतः च निवारयामासुः ?

९. विधिमाधवौ शिवं कैः वस्तुभिः पूजयामासतुः ?

१०. सर्वदेवैरभिष्टुतः शिवः कुत्र विरराज ?

११. कुत्र दत्तं हुतं जप्तं सर्वं कोटिगुणं भवेत् ?

१२. किं पञ्चकृत्यम् ?

**उत्तराणि—**

१. विष्णुः, २. समरं दिदृक्षवः, ३. माहेश्वरास्त्रं, ४. परमेश्वरः शिवः, ५. केतकपुष्पम्, ६. शिवस्यांशावतारः ब्रह्मणः, ७. विष्णवे, ८. देवजातयः, ९. पुरुषवस्तुभिः, १०. सभामध्ये, ११. लिङ्गस्थाने, १२. सृष्टिः, स्थितिः, संहारः, तिरोभावः, अनुग्रहश्च ।

—०—

## अष्टमोऽंशः

**प्रस्तावना—**

अस्मिन् तृतीये अंशे लिङ्गस्थापनविधिः तथा पूजनप्रकारः विशदतया प्रतिपादितः विद्यते । अत्रापि ओंकारजपस्य विधानं द्वितीयांशात् अधिकस्पष्टतया वर्णितं विद्यते । शिवक्षेत्रस्य माहात्म्यवर्णनं तथा आचारनिरूपणं संहितायाः विशेषत्वं प्रकटयति । शिवक्षेत्रे वासप्रसङ्गे भारतवर्षे स्थितानां शिवक्षेत्राणां विवरणं माहात्म्यञ्च अत्र सुष्ठु प्रतिपादितं विद्यते । सदाचारनिरूपणप्रसङ्गमाध्यमेन अस्यां संहितायां सर्वेषां वर्णानाम् आचरणं शोभनतया निरूपितं वर्त्तते ।

**उद्देश्यम्–**

वयम् अस्मिन् तृतीये अंशे एतान् बिन्दून् वेदिष्यामः ।

- शिवलिङ्गस्थापनं तथा पूजनविधिः ।
- ओंकारजपविधानम् ।
- शिवक्षेत्रस्य वर्णनम् ।
- शिवक्षेत्रे वासस्य माहात्म्यम् ।
- पापभेदाः ।
- सदाचारनिरूपणम् ।

**शिवलिङ्गस्थापनं तथा पूजनम्—**

शुभे काले, पुण्ये तीर्थे, अथवा जलाशयतटे यथेष्टं लिङ्गमारोप्य विधिपूर्वकं पूजयेत् । पार्थिवेन, जलेन तैजसेन च निर्मितं कल्पलक्षणसंयुक्तं सर्वलक्षणसंयुक्तं च लिङ्गं सद्यः पूजाफलप्रदमस्ति । चरे मूर्त्तौ सूक्ष्मं लिङ्गं तथा स्थावरे मूर्त्तौ स्थूलाकारं लिङ्गं स्थापयेत् । सलक्षणं सपीठं शिवलिङ्गं स्थापयेत् । मण्डलाकारं चतुरस्त्रं त्रिकोणमथवा खट्वाङ्गलिङ्गपीठं महाफलदायकं भवेत् । प्रथमं मृच्छिलादिभिः अथवा लोहादिभिः लिङ्गं कृत्वा तेनैव धातुना लिङ्गपीठञ्च कारयेत् । स्थावरलिङ्गस्येतद् विशेषत्वमस्ति । चरे लिङ्गे लिङ्गं पीठञ्च एकत्र कुर्यात् । लिङ्गं द्वादशाङ्गुलप्रमाणं भवेत् । न्यूनं चेत् अल्पं फलं लभ्यते परन्तु अधिकं न दोषायोपकल्पते ।

आदौ देवगणैर्युतं विमानं शिल्पेन कार्यम् । तत्र दर्पणसन्निभे रम्ये गर्भगृहे नवरत्नं, श्यामं मारकतं, वैदुर्यं, मुक्ताप्रवालादिकं च योजयेत् । महत्द्रव्यं मध्ये लिङ्गं स्थापयेत् । सद्योजाताद्यैः पञ्चमन्त्रैः यथाक्रमं लिङ्गं सम्पूज्य हविषा अग्नौ हुत्वा गुरुमभ्यर्च्य कामैः बान्धवान् सन्तोष्य अर्थिभ्यो ऐश्वर्यं दद्यात् । स्थावरजङ्गमं सर्वं जीवं यत्नतः सन्तोष्य महामन्त्रमोङ्कारमुदीर्य लिङ्गं पीठेन सह योजयेत्। लिङ्गं सपीठं निक्षिप्य नित्यलेपेन बन्धयेत् । एवं पञ्चाक्षरेण बेरं संस्थाप्य उत्सवार्थं बहिः आनयेत् । गुरुभ्यो अथवा साधुभिः पूजितं लिङ्गं पूजार्थं गृह्णीयात् । एवं लिङ्गे बेरे च पूजा फलप्रदा भवेत् । लिङ्गं स्थावरं जङ्गममिति द्विविधं प्रोक्तम् । तरुगुल्मादिकं स्थावरलिङ्गं कथितम् । कृमि-कीटादिकं जङ्गमं लिङ्गमित्याहुः । स्थावरलिङ्गस्य शुश्रूषा जङ्गमस्य च तर्पणं कुर्यात् । पीठमम्वामयं तथा लिङ्गं शिवमयमस्ति। यथा देवीमुमामङ्के धृत्वा शङ्करः तिष्ठति । एवं महालिङ्गं संस्थाप्य उपचारकैः पूजयेत् । नित्यपूजा यथाशक्ति ध्वजादिकरणञ्च कुर्यात् । आवाहनं, चासनम्, अर्घ्यं, पाद्यं, तदङ्गाचमनम् अभ्यङ्गपूर्वकं स्नानं, वस्त्रं, गन्धं, पुष्पं, धूपं, दीपं, नीराजनं, ताम्बुलं निवेद्य ततः नमस्कारं कृत्वा यथाशक्तिः । तर्पणं कुर्यात् । अथवा केवलम् अभिषेकं, नैवेद्यं, नमस्कारं तथा यथाशक्ति तर्पणं कृत्वा भक्तोऽपि शिवपदं प्राप्तुं शक्नोति ।

इत्थं मानुषे, आर्षे, दैवे, स्वयंभुवि, अथवा स्थापिते लिङ्गे यथा सोपचारं निवेद्य भक्तः यत्किञ्चित् फलमश्नुते । षोडशोपचारं विहाय केवलं भक्त्या प्रदक्षिणा-नमस्कारैश्च शिवपदप्राप्तिः भवेत् । नियमपूर्वकं लिङ्गदर्शनं शिवप्रदञ्चास्ति । मृत्पिष्ट-गो-शकृत्-पुष्पैः करवीरेण फलैः गुडेन नवनीतेन भस्मना अथवा यथारुचि लिङ्गं यत्नेन कृत्वाऽन्ते तदनुसारतः यजेत् । लिङ्गस्य निर्माणं सर्वत्र कर्तुं शक्यते । अत्र कर्हिचित् निषेधः नास्ति । सर्वदा शिवः प्रयासानुगुणं फलं ददाति । शिवभक्ताय लिङ्गदानेन अथवा श्रद्धया लिङ्गस्य मौल्यप्रदानेन शिवपदं प्राप्नुयात् ।

**बोधप्रश्नः—**

१. लिङ्गं कतिविधम् ?

२. कैः मन्त्रैः यथाक्रमं लिङ्गं सम्पूजयेत् ?

**ओंकारजपविधानम्—**

नित्यं दशसहस्रकं प्रणवं जप्त्वा शिवपदं प्राप्नुयात् । अथवा सन्ध्ययो: एकसहस्रं प्रणवं जप्त्वा भक्तस्य शिवपदप्राप्ति: भवेत् । जपकाले मकारान्तं मन: शुद्धिकरं भवेत् । समाधौ प्रणवस्य मानसं जपं कुर्यात् । उपांशु सार्वकालिकमस्ति । तथा च बिन्दुनादयुक्तस्य प्रणवस्य वाचिकजपं कुर्यात् । अथवा नित्यं पञ्चाक्षरं मन्त्रम् अयुतं जपेत् । सन्ध्ययो आदरात् पञ्चाक्षरमन्त्रसहस्रं जप्त्वा शिवपदं प्राप्तुं शक्नुयात् । आदौ प्रणवसंयुक्तं पञ्चाक्षरजपं ब्राह्मणानां कृते अधिकं फलप्रदम् । फलप्राप्तये गुरो: मन्त्रदीक्षां गृह्णीयात् । घटस्थान-मन्त्रदीक्षा-मातृकान्यासयुक्त: सत्यपूतात्मा ब्राह्मण: गुरुपदभाक् भवति । ब्राह्मणानां कृते 'नम:' शब्दस्य प्रयोग आदौ तथा अन्येषां कृते अन्ते प्रयोग: विधीयते । स्त्रीणां कृते 'नम:' शब्दस्य प्रयोग: अन्ते एव करणीय:, परन्तु ब्राह्मणस्त्रिय: 'नम:' शब्दप्रयोगम् आदौ कर्त्तुं प्रभवन्ति । पञ्चाक्षरमन्त्रस्य पञ्चकोटिजपं कृत्वा सदाशिवसमो भवेत् । एक-द्वि-त्रि-चतुष्कोट्या ब्रह्मादीनां पदं व्रजेत् । अथवा मन्त्रस्य प्रत्येकाक्षरानुसारं तथासंख्यकं लक्षमन्त्रं जपेत् । अनेन प्रकारेण मन्त्राक्षरसंख्यकस्य लक्षमन्त्रस्य जपं कृत्वा शिवपदं प्राप्नुयात् । तथा च सहस्रेण दिनै: सहस्रसहस्राणां मन्त्राणां जप इष्टसिद्धिदायको भवेत् । ब्राह्मणेभ्य: भोजनदानपूर्वकं मन्त्रजप: फलदायको भवति अन्यथा न । ब्राह्मण: प्रात: नित्यम् अष्टोत्तरसहस्रं गायत्रीं जपेत् । नियममास्थित: सन् वेदमन्त्रान् सूक्तानि च जपेत् । एकाक्षरात् दशाक्षरपर्यन्तं मन्त्रम् एकशतवारं जपेत्। ततोधिकमक्षरयुक्तं मन्त्रं दशसहस्रं सहस्रं शतमेकं वा जपेत्, न्यूनं न जपेत् । वेदपारायणमपि शिवपदप्रदायकम् अस्ति । पुनश्च अन्यान् बहुतरान् मन्त्रान् अक्षरलक्षत: जपेत् । एकाक्षरमन्त्रं कोटिवारं जपेत् । तत: परं नित्यं भक्तिपूर्वकं सहस्रं जपेत् ।

**बोधप्रश्न:—**

१. नित्यं पञ्चाक्षरं मन्त्रं कति जपेत् ?

२. ब्राह्मण: कदा गायत्रीं जपेत् ?

**शिवक्षेत्रस्य वर्णनम्—**

सशैलवनकामना पृथिवी पञ्चाशत्कोटियोजनविस्तीर्णास्ति, शिवाज्ञया लोकं धृत्वा तिष्ठति । पृथिवीनिवासिनां मोक्षार्थं कृपया देव: त्रिलोचन: शिवक्षेत्रं कल्पितवान् । ऋषीणां तथा देवानां परिग्रहात् तीर्थानि जातानि, लोकरक्षार्थमेव कानिचित् स्वयंभूतानि तीर्थानि च सन्ति । अत: तीर्थे क्षेत्रे च स्नान-दान-जपादिकं कुर्यात् । अन्यथा नर: रोगदारिद्र्यादिकं प्राप्नुयात् ।

अस्मिन् भारतवर्षे नरः यदि मरणं प्राप्नोति तर्हि स ब्रह्मलोकवासानन्तरं पुनर्मानुष्यं प्राप्नोति । पुण्यक्षेत्रे पापस्य करणं दृढं भवति । तस्मात् पुण्यक्षेत्रे अण्वपि पापं नाचरेत् । नरः येन केनाप्युपायेन पुण्यक्षेत्रे वसेत् । तेषु पुण्यक्षेत्रेषु शतनदीतीरे अनेकशः पुण्यक्षेत्राणि सन्ति । षष्टिमुखा सरस्वती नदी पुण्या प्रोक्ता । तत्तीरे निवासेन ब्रह्मपदप्राप्तिर्भवेत् । हिमालयजा शतमुखा गङ्गा पुण्या नदी अस्ति । तत्तीरे काश्यादि अनेकशः पुण्यक्षेत्राणि सन्ति । मृगे मृगबृहस्पतौ तत्तीरं प्रशस्तमस्ति । दशमुखः शोणभद्रः पुण्योऽभीष्टफलप्रदश्चास्ति । तत्र स्नानोपवासेन वैनायकं पदं लभेत् । चतुर्विंशमुखा महानदी नर्मदा पुण्यदा अस्ति । तस्यां स्नानेन वासेन वैष्णवं पदमाप्नुयात् । द्वादशमुखा तमसानदी तथा, दशमुखा रेवानदी तथा च एकविंशमुखा ब्रह्मगोवधपापनाशिनी महापुण्या गोदावरीनदी एताः नद्यः रुद्रलोकप्रदायिन्यः सन्ति । विष्णुलोकप्रदायिनी सर्वपापक्षयावहा पुण्यनदी कृष्णवेणी अष्टादशमुखा प्रोक्ता। ब्रह्मलोकप्रदायिनी तुङ्गभद्रा दशमुखा अस्ति । नवमुखा सुवर्णमुखरीनदी पुण्यानदी अस्ति । सरस्वती, पम्पा, कन्या तथा श्वेतनदी शुभानद्यः सन्ति । एतासां तीरवासेन इन्द्रलोकमवाप्नुयात् । सह्याद्रिजा महापुण्या महानदी कावेरीति कथिता । सा नदी सप्तविंशमुखा प्रोक्ता । तत्तीराः स्वर्गदा तथा ब्रह्मविष्णुपदप्रदा चास्ति । मेषमे गुरौ रवौ च नैमिषे बदरे स्नानं कुर्यात् । सिंहे कर्कटगे रवौ सिन्धुनद्यां स्नानं कृत्वा ब्रह्मलोकं प्राप्नुयात् । सिंहबृहस्पतौ सिंहमासे गोदावर्यां स्नानं कुर्यात् । तेन शिवलोकप्राप्तिर्भवति । कन्यागते गुरौ रवौ यमुनाशोणयोः स्नायात् । तेन धर्मलोकस्य तथा गणेशलोकस्य प्राप्तिः भवति । तुलाग्रे रवौ गुरौ कविर्यां स्नानेन सर्वाभीष्टप्राप्तिः भवति । वृश्चिके मासि गुरुवृश्चिके संप्राप्ते अर्के नर्मदायां स्नानाद् विष्णुलोकमवाप्नुयात् । मृगमासि मृगये गुरौ जाह्नव्यां यः स्नानं करोति तस्य शिवलोकप्राप्तिः भवति । पुनश्च स ब्रह्मविष्णोः पदे भुक्त्वा तदन्ते ज्ञानलाभमपि करोति । कुम्भते रवौ माघमासे गङ्गायां श्राद्धं पिण्डदानम् अथवा तिलोदकं कृत्वा कुलकोट्युद्धारं कुर्यात् । मीनगे गुरुरवौ कृष्णवेण्यां स्नानं बुधाः प्रशंसन्ति । गङ्गां सह्यजां समाश्रित्य बुधः वसेत् । तत्र निवासेन तत्कालकृतपापस्य निश्चितरूपेण नाशो भवति । एवमनेकशः रुद्रलोकप्रदानि क्षेत्राणि सन्ति । तथा च ताम्रपर्णी वेगवती ब्रह्मलोकप्रदे नद्यौ स्त । तयोस्तीरे स्वर्गदानि क्षेत्राणि सन्ति । तन्मध्ये भूरिशः पुण्यदानि क्षेत्राणि सन्ति । तत्र तत्र वसन् प्राज्ञः तादृशं फलं लभेत् । अतः प्राज्ञः तादृशे पुण्यक्षेत्रे सदाचारेण सद्वृत्त्या युक्तः सन् वसेत् । अन्यथा तत्फलं न लभेत् । कारणं यथा विद्येश्वरसंहितायाम्–

पुण्यक्षेत्रे कृतं पुण्यं बहुधा ऋद्धिमृच्छति ।
पुण्यक्षेत्रे कृतं पापं महदण्वपि जायते ।। २२.३६

**पापभेदाः—**

विद्येश्वरसंहितायां पापभेदा: सुष्ठुरूपेण निरूपिता: सन्ति । कायिक-वाचिक-मानसिकभेदेन पापं त्रिविधम् । यथा कायिक-वाचिक-मानसिकपुण्यमैश्वर्यं प्रददाति तथा च त्रिविधं पापं मनुष्यं विनाशयति । एषु पापेषु मानसं पापं वज्रलेपसदृशं कठिनं भवति । कल्पकल्पान्तरं यावत् पुरुषमनुसरति। भगवत: ध्यानादेव इदं पापं नश्यति, अन्यथा न । वाचिकं पापं जपजालेन नाशयेत् । कायिकपापञ्च कायाशोषणात् नश्येत् । तथा च पुण्यपापयो: बीजांशो वृद्ध्यंशो भोगांशश्च भवन्ति । पुण्यबीजांशेन पुण्यस्य तथा पापबीजांशेन पापस्य च वृद्धिः भवति । पुण्यस्य वृद्ध्यंशेन पुण्यवृद्धिः तथा पापस्य वृद्ध्यंशेन पाप वर्द्धेत् । इत्थं पुण्यभोगांशेन पुण्यभोग:, भवति तथा- पापस्य भोगांशेन उत्तमभोगनाशश्च भवेत् । भोगांशो भोगेन एव नश्यति । पुण्यकोटिभिश्च अन्यथा न भवति । बीजप्ररोहे नष्टे यदवशिष्यते तत्तु भोगाय कल्पते । फलभोगस्य कदापि नाशो न भवति । परन्तु देवानां पूजया, ब्राह्मणेभ्य: दानेन तथा तपसा तद् भोग: नृणां सह्यो भवेत् । तस्मात सुखमिच्छता नरेण पापमकृत्वैव वस्तव्यम् ।

**बोधप्रश्नाः—**

१. किदृशं पापं वज्रलेपसहशं कठिनं भवति ?

२. पापपुण्ययो: कति अंशा: भवन्ति ?

३. कथं भोगांश: नश्यति ?

**शिवक्षेत्रे वासस्य माहात्म्यम्—**

शिवक्षेत्रस्य पुष्पारामादिसमार्जनं कृत्वा तथा च शिवक्षेत्रे वासं कृत्वा शिवपदं लभेत्। जडानामजडानां सर्वेषां कृते शिवक्षेत्रं मुक्तिदायकमस्ति । तस्मात् बुध आमरणं शिवक्षेत्रे वासं कुर्यात्। मनुष्यस्थापितलिङ्गात् हस्तशतं यावत् क्षेत्रं शिवक्षेत्रमिति कथ्यते । आर्षके लिङ्गे सहस्रारतिमात्रं क्षेत्रं शिवक्षेत्रमिति संज्ञितम् । दैवलिङ्गेऽपि तथा प्रमाणं क्षेत्रं शिवक्षेत्रं कथितम् । स्वयंभुवि लिङ्गे सहस्रधनु: प्रमाणं क्षेत्रं शिवक्षेत्रमिति स्मृतम् । तत्र स्नात्वा, दत्त्वा जप्त्वा च शिवं व्रजेत् तस्मात् शिवक्षेत्रं समाश्रित्य आमरणं वसेत् । तत्र दाहं, दशाहं, मास्यं, सपिण्डीकरणम्, आब्दिकम् अथवा पिण्डदानं एतत्सर्वं शिवपदप्रदायकं पापविनाशकञ्चास्ति । शिवक्षेत्रे सप्तरात्रम्, पञ्चरात्रकं, त्रिरात्रमेकरात्रं वा वसेत् । शिवक्षेत्रे निवासं सद्य: शिवपदप्राप्तिकरमस्ति । शिवक्षेत्रे कामनया कृतं सर्वं सद्य: फलदायकमस्ति ।

अकामेन कृतं सर्वं साक्षाच्छिवपदप्रदञ्चास्ति । प्रातः शिवपूजनं विधिकरं प्रोक्तं, मध्याह्ने कामिकं, सायाह्ने तथा रात्रौ शिवपूजनं शान्तिकं कथितम् । निशि मध्ययामद्वयं निशीथः प्रोक्तः । तत्काले शिवपूजनं विशेषेण अभीष्टसिद्धिदं भवति । कलौ युगे विशेषेण कर्मणा फलसिद्धिः भवति ।

**सदाचारनिरूपणम्—**

सदाचारयुतो विद्वान्नामतो ब्राह्मणः कथ्यते । वेदाचारयुतो विद्वान् विप्र उच्यते तथा ह्येतैरेकैकवान् पुरुषः द्विज उच्यते । अल्पाचार अल्पवेदः राजसेवकः क्षत्रियः कथ्यते । कृषिवाणिज्यकृत् किञ्चिदाचारवान् पुरुषः वैश्यः कथ्यते । कर्षकः ब्राह्मणः शूद्रब्राह्मणः कथ्यते । निन्दकः परद्रोही चण्डाल-द्विज उच्यते । पृथिवीपालको राजा कथ्यते, इतरे च क्षत्रियाः मताः । धान्यादिक्रयवान् पुरुषः वैश्य उच्यते । अन्ये च वणिगुच्यन्ते । ब्रह्म-क्षत्रिय-वैश्यानां यः सेवां करोति स शूद्रः कथ्यते । शूद्रेषु यः कृषिं करोति स वृषलो ज्ञेयः, इतरे च दस्यव उच्यन्ते । प्रत्येकमनुष्यः प्रातरुत्थाय पूर्वमुखः सन् इष्टं चिन्तयेत् । ततः धर्मानर्थांश्च चिन्तयेत् । पूर्वमुखः सन् शय्यां त्यक्त्वा यदि मनुष्यः उत्थितो भवति तर्हि तस्य आयुर्बृद्धिः भवति । अग्निकोण-दक्षिण-पश्चिम-वायव्य-उत्तर-ईशानभिमुखः सन् उत्थानेन मनुष्यः क्रमेण द्वेषं, मरणसदृशं कष्टं, पापं, भाग्यं,व्याधिं, पुष्टिं तथा शक्तिं लभते । निशाया अन्तिमयाम 'उषा' कथ्यते । यामार्धं धरुच्यते । तत्काले समुत्थाय गृहाद् दूरं गत्वा ब्राह्मणः उत्तराभिमुखः सन् विण्मूत्रे विसृजेत् । मलमुत्सृज्य चोत्थाय तन्मलं न पश्येत् । तत उद्धृतेन जलेन जलात् बहिः शौचं कुर्यात् । तथा च येन केन च पात्रेण काष्ठेन च दन्तधावनं जलाद् बहिः कुर्यात् । जलदेवान् नमस्कृत्य मन्त्रेण स्नानमाचरेत् । कण्ठदध्नं कटिदध्नं वा अशक्तः आजानुजलमाविश्य मन्त्रस्नानं समाचरेत् । तत्र तीर्थजलेन विद्वान् देवादीन् तर्पयेत् । धौतवस्त्रं समाधाय पञ्चकच्छेन धारयेत् । सर्वेषु कर्मसु उत्तरीयं धारयेत् । नद्यादितीर्थस्नाने स्नानवस्त्रं न शोधयेत् । वापी-कूप-गृहादिषु स्नानवस्त्रं शोधयेत् । जाबालकोक्तमन्त्रेण भस्मना च त्रिपुण्ड्रकं रचयेत् । मन्त्रं विना भस्म जले यः पातयति तस्य नरकगतिः भवति । 'आपो हिष्ठा मयो भुवः' इति मन्त्रं पठित्वा पापशान्तये शिरसि जलं प्रोक्षयेत् । ततः तेनैव मन्त्रेण पादे मूर्ध्नि हृदि, हृत्पादः तथा हृत्पादमूर्ध्नि मन्त्रस्नानं कुर्यात् । एतदेव सन्धिप्रोक्षणं तथा च मन्त्रस्नानं कथ्यते । अपवित्रवस्तुस्पर्शे, दौस्वास्थ्ये राजराष्ट्रभये, गतिकाले च मन्त्रस्नानं समाचरेत् । प्रातः सूर्यानुवाकेन सायमग्न्यनुवाकतः तथा मध्याह्ने अपः पीत्वा प्रोक्षणमाचरेत् । गायत्रीमन्त्रोच्चारणपूर्वकम् ऊर्ध्वं त्रिवारं सूर्याय जलं क्षिपेत् । मध्याह्ने-सन्ध्याकाले च पुनः एकवारं सूर्याय अर्घ्यं दद्यात् । सायाह्ने पश्चिमदिङ्मुखः सन् सान्ध्योपासनां समाचरेत् । प्रातःकाले तथा मध्याह्ने अङ्गुलिभिः जलमुद्धृत्य दद्यात्। अङ्गुलीनां रन्ध्रेण दिवाकरं लम्बं पश्येत् ।

**बोधप्रश्नः—**

१. यामार्धं किमुच्यते ?

आत्मप्रदक्षिणं कृत्वा शुद्धाचमनमाचरेत् । सायं मुहूर्त्तादर्वाक्कृता सन्ध्या वृथा भवेत् । सन्ध्यां विना दिवाऽतीते गायत्रीं क्रमात् शतं जपेत् । आदशाहात् पराऽतीते गायत्रीं लक्षमभ्यसेत् । मासातीते पुनश्चोपनयनं चरेत्, तथा च ईश-गौरी-गुहे-विष्णु-ब्रह्म-चन्द्र-यमम् एवंरूपान् देवान् अर्थसिद्धये तर्पयेत् । ततः ब्रह्मार्पणं कृत्वा शुद्धाचमनमाचरेत् । प्रणवं पूर्वमभ्यस्य तदनन्तरं गायत्रीमभ्यसेत् । जीवब्रह्मैक्यविषयं बुद्ध्वा प्रणवमभ्यसेत् । 'त्रैलोक्यसृष्टिकर्त्तारं ब्रह्माणं स्थितिकर्तारमच्युतं, तथा संहर्त्तारं रुद्रम् उपास्महे' इति चिन्तयेत् । ज्ञानकर्मेन्द्रियाणां मनोवृत्तिधियः, तथा भोगमोक्षप्रदधर्मे ज्ञाने च 'प्रेरकरूपेण य ईश्वरं चिन्तयति तस्य ब्रह्मप्राप्तिर्भवेत् । प्रातः ब्राह्मणपुङ्गवः अर्थज्ञानं विना सहस्त्रं जपेत् । अन्ये मध्याह्ने शतं जपेत् । सायं द्विशतकं जपेत् । मूलाधारं समारभ्य ब्रह्मरन्ध्रं यावत् द्वादशचक्रेषु विघ्नेश-ब्रह्म-विष्णववीश-जीवात्मपरमेश्वरान् ब्रह्मबुद्ध्या सोऽहं भावनया जपेत् । आदौ तान् ब्रह्मरन्ध्रादौ कायाद् वाह्ये च भावयेत् । महत्तत्त्वं समारभ्य सहस्त्रकं शरीरमतिक्रम्य शनैः शनैः शरीराध्यासं विहाय आत्मानं परमात्मनि संयोगमेव जपतत्त्वं कथितम् । इत्थं प्रतिदिनम् अष्टाधृकं द्विसहस्त्रं जपेत् । मन्त्राणां जपमेवंप्रकारेण कुर्यात् । नित्यं सहस्त्रं जपं कृत्वा ब्रह्मपदं, शतवारं जप्त्वा इन्द्रपदञ्च लभेत् । प्रत्यहं दिवाकरमुपस्थाय नित्यमित्थं जपं समाचरेत् । द्वादशलक्षजपेन पूर्णब्राह्मणः भवेत् । लक्षगायत्र्याहीनं ब्राह्मणं वेदकार्ये न योजयेत् । आसप्तते तु नियमानुसारं तिष्ठेत् । तदनन्तरं प्रव्राजनं चरेत् । प्रव्राजी नित्यं प्रातः द्वादशसाहस्त्रं प्रणवं जपेत् । नित्यमेवं क्रमात् जपेत् इत्थं सार्द्धलक्षजपं मासाभ्यन्तरे कुर्यात् । अत ऊर्ध्वमतिक्रान्ते पुनः प्रैषं समाचरेत् एवं कृत्वा दोषशान्तिः कुर्यात् । अन्यथा रौरवं व्रजेत् ।

**बोधप्रश्नः—**

१. ब्राह्मणपुङ्गवः मध्याह्ने कति गायत्रीमभ्यसेत् ?

२. धर्मः कतिविधः प्रोक्तः ?

गार्हस्थ्ये धर्मार्थलाभनिमित्तं यत्नः करणीयः । मुक्तिकामो ब्राह्मणः सदा ब्रह्मज्ञानमभ्यसेत् । धर्मादर्थो जायते, अर्थतः भोगः प्रवर्त्तते । भोगाद् वैराग्यसम्भवः । धर्मार्जितार्थभोगेन वैराग्यमुपजायते। परन्तु अधर्मोपार्जितार्थेन राग एव प्रजायते । धर्मः द्विविधः प्रोक्तः । द्रव्यधर्म देहधर्मश्च । यज्ञादिकर्म द्रव्यधर्म तथा तीर्थस्नानादिदैहिककर्म कथ्यते । धनेन धनस्य प्राप्तिर्भवति तथा च तपसा सुरूपता प्राप्यते । निष्कामः शुद्धिमाप्नोति । शुद्ध्या ज्ञानं प्राप्यते । कृतादौ तपः ध्यानञ्च धर्ममिति कथितम् । त्रेतायां तपसा धर्मलाभः तथा द्वापरे यजनात् ज्ञानं प्राप्यते । कलौ प्रतिमापूजनं धर्ममिति निरूपितम् । नरः यादृशं पुण्यपापमाचरति तादृशं सुखदुःखात्मकं फलं प्राप्यते । मनुष्यः अधर्माद् दुःखमाप्नोति तथा च धर्मात् सुखमेधते । दुर्वृतितो दुःखं तथा सुवृत्रितः सुखं लभते । अतः भोगमोक्षयोः सिद्धये धर्मार्जनं कुर्यात् । शतवर्षाय सकुटुम्बाय चतुर्जनयुताय ब्राह्मणाय वृत्तिं दत्त्वा ब्रह्मलोकं व्रजेत् । सहस्रचान्द्रायणव्रताचरणं कृत्वा ब्रह्मलोकं प्राप्नुयात् । क्षत्रियः सहस्रसकुटुम्बब्राह्मणान् प्रतिष्ठापयेत् । तेन तस्य इन्द्रलोकप्राप्तिः भवेत् । अयुतब्राह्मणानां कुटुम्बप्रतिपोषणं कृत्वा क्षत्रियः ब्रह्मलोकं ब्रजेत् । यां देवतां पुरस्कृत्यः नरो दानमाचरते स तस्य देवस्य लोकं गच्छेत् ।

सर्वे नराः न्यायोपार्जितमार्गेण धनमर्जयेयुः । न्यायार्जितस्य वित्तस्य दानात् सिद्धिप्राप्तिः भवति । अन्यथा न । तथा तीर्थस्नानेन तपसा च अक्षयं सुखमश्नुते । ब्राह्मण अदैन्यात् नातिक्लेशात् धनमर्जयेत् । क्षत्रियः बाहुवीर्येण, वैश्यश्च कृषिगोरक्षणाद् धनमर्जयेताम् । गुर्वनुग्रहात् ज्ञानसिद्ध्या मोक्षसिद्धिः भवेत् । मोक्षात् स्वरूपसिद्धिः स्यात् । ततः परानन्दं समश्नुते सत्सङ्गात् नराणाम् एतत्सर्वं जायते । गृहमेधिना धनधान्यादिकं, सर्वञ्च वस्तुजातं ब्राह्मणेभ्यो देयम् । आत्मवित्तं त्रिधा विभज्य धर्मवृद्ध्यात्मभोगतः नित्यं नैमित्तिकं काम्यं कर्म धर्मतः कुर्यात् । साधकः वित्तस्य वर्द्धनं वृद्ध्यंशेन कुर्यात् । हितेन मितमेध्येन भोगांशतः भोगं चरेत् ।

**बोधप्रश्नः—**

१. कस्मात् स्वरूपसिद्धिः स्यात् ।

२. कथं धनं वर्जयेत् ?

कृष्यर्जितधनस्य दशांशं पापस्य शुद्धये दद्यात् । शेषेण धर्मादि कुर्यात् । अन्यथा नरकं व्रजेत्। वाणिज्यके षडंशो विचक्षणैः देयः । शुद्धप्रतिग्रहे चतुर्थांशो द्विजोत्तमैः देयः । अकस्मादुत्थितेऽर्थे अर्धं देयम् । असत्प्रतिग्रहे सर्वं दुर्दानं सागरे क्षिपेत् । आत्मभोगसमृद्धये आहूय दानं कर्त्तव्यम् । शक्त्यनुसारतः पृष्टं दानं देयम् । अन्यथा जन्मान्तरे ऋणी स्यात् । परेषां दोषं विचक्षणः न प्रशंसेत् । श्रुतं दृष्टं च दोषं

विशेषेण न वदेत् । सर्वजन्तूनां हृदि रोषकरं वचनं बुधः न वदेत् । ऐश्वर्यसिद्धये सन्ध्ययोरग्नि-कार्यं कुर्यात् । अशक्तः तु एककाले सूर्याग्नीं कुर्यात् । तण्डुलं, धान्यमाज्यं वा फलं, कन्दं तथा हविः स्थालीपाकं कुर्यात् । तमजस्त्रमिति बुधाः वदन्ति । स्थालीपाके अशक्तः जपमात्रं कुर्यात् । जपाभावे सूर्यवन्दनञ्च कुर्यात् । एवमात्मार्थिनः अर्थार्थी च यथाविधि कुर्युः । ब्रह्मयज्ञरताः, देवपूजारताः, अग्निपूजापराः, ब्राह्मणानां तृप्तिकराः तथा गुरुपूजारताश्चेते सर्वे स्वर्गस्य भागिनः भवन्ति ।

**पारिभाषिकशब्दाः—**

| | | |
|---|---|---|
| साकृतिः | - | साकाररूपम् । |
| पञ्चकृत्यः | - | सृष्टिः, स्थितिः, संहारः, तिरोभावः, अनुग्रहश्च । |

## सारांशः

शिवपुराणस्य विद्येश्वरसंहितायाः एकादशाध्यायात् त्रयोदशाध्यायमध्ये एते प्रमुखा विषयाः। अपि चर्च्चिताः सन्ति । यथा- शिवलिङ्गस्य स्थापनं तथा पूजनप्रकारः, ओंकारजपविधानम्, शिवक्षेत्रस्य वर्णनं, शिवक्षेत्रे वासस्य महत्त्वम्, सदाचारनिरूपणञ्च । शिवलिङ्गस्य स्थापनप्रसङ्गे तत्र वर्णितं यत् शुभे काले पुण्ये तीर्थे अथवा जलाशयतटे सर्वलक्षणसंयुक्तं सपीठं स्थावरमथवा चरलिङ्गं स्थापयेत्। ततः आवाहनं चासनम् अर्घ्यपाद्यादिकं यथाशक्ति समर्प्य भक्त्या नमस्कारादिकं कृत्वा भक्तः शिवपदमपि प्राप्तुं शक्नुयात् । इत्थं मानुषे, आर्षे, दैवे, स्वयंभुवि अथवा स्थापिते लिङ्गे सोपचारं समर्प्य भक्तः यत्किञ्चित् फलमश्नुते । भक्त्या यत्र कुत्रापि शिवलिङ्गं संस्थाप्य पूजनेन शिवः प्रयासानुगुणं फलं ददाति । तथा च भक्त्या प्रणवसंयुक्तं पञ्चाक्षरमन्त्रं यथाविधि जप्त्वा शिवपदं प्राप्नुयात् । आदौ सत्यपूतात्मानं ब्राह्मणं गुरुरूपेण गृहीत्वा तस्मात् मन्त्रदीक्षां गृह्णीयात् । तदनन्तरं नियममास्थित सन् वेदमन्त्रान् सूक्तानि च जपेत् । सांसारिकाणां जनानां मोक्षार्थं कृपया शिवः क्षेत्रं कल्पितवान् । तेषु क्षेत्रेषु तीर्थस्थलेषु स्नान-दान-जपादिकं कृत्वा पुण्यलाभं कुर्यात् । तीर्थेषु पुण्याचरणेन यथा पुण्यवृद्धिः भवति तथा च तत्र पापस्य करणं दृढं भवति । अतः पुण्यक्षेत्रे कदापि पापं नाचरेत् । येनकेनाप्युपायेन पुण्यक्षेत्रे च वसेत् । शिवक्षेत्रे दाहं, दशाहं, मास्यं, सपिण्डीकरणम्, आब्दिकमथवा पिण्डदानम् एतत्सर्वं शिवपदप्रदायकं पापविनाशकञ्चास्ति । प्रत्येकमनुष्यः स्वजीवने सदाचारयुतः भवेत् । दिनचर्यायां स प्रातरुत्थाय पूर्वमुखः सन् इष्टं चिन्तयेत् । निशाया अन्तिमो यामो 'उषा' कथ्यते । तत्काले समुत्थाय गृहाद् दूरं गत्वा उत्तराभिमुखः सन् विण्मूत्रे विसृजेत् । तत उद्धृतेन जलेन जलात् बहिः शौचं कुर्यात्। दन्तधावनादिकं कृत्वा ब्राह्मणः स्नानतर्पणादिकं कुर्यात् । ब्रह्मार्पणं कृत्वा शुद्धाचमनमाचरेत् । प्रणवं पूर्वमभ्यस्य तदनन्तरं गायत्रीमभ्यसेत् प्रतिदिनम् अष्टाधिकं द्विसहस्त्रं गायत्रीं जपेत् ।

## आदर्शप्रश्नाः

**लघूत्तरीयाः प्रश्नाः—**

१. पापभेदाः लिखत ।

२. पापोपशमोपायाः लिखत ।

३. शिवक्षेत्रे वासः लिखत ।

**विश्लेषणात्मकाः प्रश्नाः—**

१. शिवलिङ्गस्थापनविधिं प्रतिपादयत ।

२. ओंकारजपविधानं विवृणुत ।

३. शिवक्षेत्रे वासस्य महत्त्वं निरूपयत ।

**निबन्धात्मकः प्रश्नः—**

१. शिवलिङ्गस्य माहात्म्यं पूजनविधिञ्च लिखत ।

२. शिवपुराणानुसारं सदाचारं निरूपयत ।

**एकाङ्कप्रश्नाः—**

१. शिवलिङ्गं कुत्र आरोपयेत् ?

२. लिङ्गपीठं कीदृशं भवेत् ?

३. समाधौ प्रणवस्य जपं कथं कुर्यात् ?

४. कुत्र अण्वपि पापं नाचरेत् ?

५. का नदी सप्तविंशमुखा प्रोक्ता ?

६. के ब्रह्मलोकप्रदे नद्यौ ?

७. पापं कतिविधम् ?

८. भोगांशः कथं नश्यति ?

९. का उषा कथिता ?

१०. कुत्र स्नानवस्त्रं न शोधयेत् ?

११. केन मन्त्रेण त्रिपुण्ड्रकं रचयेत् ?

१२. कदा मन्त्रस्नानं समाचरेत् ?

**उत्तराणि—**

१. पुण्यतीर्थे अथवा जलाशयतटे, २. कल्पलक्षणसंयुक्तं सर्वलक्षणसंयुक्तञ्च, ३. मानसजपम्, ४. पुण्यक्षेत्रे, ५. कावेरी, ६. ताम्रपर्णीवेगवतीनद्यौ, ७. त्रिविधम्, ८. भोगेन, ९. निशाया अन्तिमो यामः, १०. नद्यादितीर्थस्थाने, ११. जाबालोक्तमन्त्रेण, १२. अपवित्रवस्तुस्पर्शे, दौस्त्वास्थ्ये, राजराष्ट्रभये, गतिकाले च ।

—०—

## नवमोऽंशः

**प्रस्तावना—**

विद्येश्वरसंहिताया अस्मिन् अंशे यज्ञविषयकवर्णनं बाहूल्येन कृतमस्ति । यज्ञभेदः यज्ञस्य कृते स्थाननिरूपणादिकं सर्वं तत्त्वम् अत्र पूर्णतया समुस्थापितं वर्त्तते । फलाप्तये लिङ्गपूजनविधानम् अस्मिन् अंशे सुष्ठु निरुपितं वर्त्तते । बिन्दुनादात्मकतत्त्वनिरूपणं संहितायाः निजस्ववैशिष्ट्यम् । प्रणवपञ्चाक्षरमन्त्रमाहात्म्यं जपविधिश्च अत्र सम्पूर्णतया प्रतिपादितो विद्यते । बन्धमोक्षरूपशिवलिङ्गमाहात्म्ये शिवलिङ्गभेदः तथा पूजनमाहात्म्यं सम्यक्तयोपस्थापितं विद्यते ।

**उद्देश्यम्—**

प्रियपाठकाः, विद्येश्वरसंहिताया अस्मिन् अंशे वयम् एतान् बिन्दून् वेदिष्यामः ।

- अग्नियज्ञ-देवयज्ञ-ब्रह्मयज्ञश्च ।
- फलाप्तये पार्थिवपूजननिरूपणम् ।
- महानैवेद्यं जन्मनैवेद्यं च ।
- बिन्दुनादात्मकं तत्त्वम् ।
- प्रणवपञ्चाक्षरमन्त्रमाहात्म्यम् ।
- शिवयोगिनः
- बन्धमोक्षरूपशिवलिङ्गमाहात्म्यम् ।
- लिङ्गभेदः ।

**अग्नियज्ञ-देवयज्ञ-ब्रह्मयज्ञश्च—**

पुरोहित अग्नौ यद् द्रव्यं जुहोति सोऽस्ति अग्नियज्ञः । ब्रह्मचर्याश्रमास्थानां प्रथमाश्रमिणां तत्कृते विशेषयजनादिकं विधीयते । तदस्ति ब्रह्मयज्ञः । आत्मन्यारोपिताग्नीनां वनिनां यतिनां हितं, मितं, स्वकाले भोजनञ्च 'हुतिः' कथ्यते । 'यन्मुखं तदाहवनीयम्' इति श्रुतिवचनानुसारं तेषां मुखम् आहवनीयाग्निरस्ति । उपासनाग्निं (वैवाहिकाग्निं) कुण्डे अथवा भाण्डे सुरक्षितं कुर्यात् । राजदैवभयवशात् अग्निम् आत्मन्यरण्यां वा समारोपयेत् । परन्तु अग्नेः त्यागं न कुर्यात् । अयं 'आरोपिताग्निः' कथितः ।

सायमग्न्याहुतिः सम्पत्करी अस्ति । प्रातः सूर्याहुतिः आयुष्करीति विज्ञेया । दिवा अग्नेः सूर्यनिवेशनात् अयम् 'अग्नियज्ञः' कथितः । इन्द्रादीन् देवानुद्दिश्य यः यज्ञः क्रियते तदस्ति 'देवयज्ञः' । वेदाध्ययनादिकं ब्राह्मणानां कृते 'ब्रह्मयज्ञः' कथ्यते । देवतानां तृप्तये ब्राह्मणः यज्ञं कुर्यात् ।

देवानां तृप्तये पूजा पञ्चधा प्रकल्पिता । ताः यथा- तत्तन्मन्त्रजपो, होमो, दानं, तपः तथा स्थण्डिले प्रतिमायां च तेषां षोडशोपचारपूजनं । नेत्रयोः शिरसो रोगे तथा कुष्ठस्य शान्तये आदित्यं पूजयित्वा ततः ब्राह्मणान् भोजयेत् । इत्थं दिनं, मासं तथा वर्षम् अथवा वर्षत्रयं पूजयेत् । प्रारब्धं चेत् प्रबलं स्यात् रोगज्वरादिकं नश्येत् । इष्टदेवस्य जपाय अत्र वारादीनां फलमपि कथितम् ।

पापशान्तये आदिवारे आदित्यस्य पूजां कुर्यात् । बुधः सम्पदर्थं सोमवारे लक्ष्म्यादीन् यजेत्, सपत्नीकं ब्राह्मणञ्च भोजयेत् । रोगप्रशान्तये भौमवारे काल्यादीन् यजेत् । माषमुद्गाढकान्नेन ब्राह्मणांश्चैव भोजयेत् । पण्डितः जनः सौम्यवारे दध्यन्नेन विष्णुं यजेत् । तेन सर्वदा पुत्र-मित्र-कलत्रादिपुष्टिः भवति । गुरोर्वारे आयुष्कामो देवानां पुष्टिसिद्धये उपवीतेन, वस्त्रेण क्षीराज्येन ब्राह्मणान् भोजयेत् । भोगार्थं भृगुवारे षड्रसोपेतमन्नं ब्राह्मणतृप्तये दद्यात् । स्त्रीणां तृप्तये शुभं वस्त्रादिकं देयम् । अपमृत्युहरणार्थं शनिवासरे (मन्दे) रुद्रं यजेत् । तिलहोमेन, दानेन, तिलान्नेन ब्राह्मणान् सन्तोषयेत् । इत्थम् आरोग्यादिनिमित्तं विबुधान् यजेत्, फलं च लभेत । देवानां नित्ययजने, विशेषयजने, स्नाने, दाने, जपे, होमे, ब्राह्मणानाञ्च तर्पणे तिथिनक्षत्र-योगादिकं विशेषफलदायकं भवति । देशकालानुसारेण, पात्रानुसारतः, द्रव्यश्रद्धानुसारेण, लोकानुसारतश्च तारतम्यक्रमाद् देवा आरोग्यादीन् प्रयच्छन्ति । शुभादावशुभान्ते जन्मर्क्षेषु च गृही गृहे आरोग्यादि निमित्तं समृद्ध्यर्थञ्च आदित्यादीन् ग्रहान् यजेत । देवयजनं नराणां कृते सर्वाभीष्टफलप्रदमस्ति । ब्राह्मणानां कृते मन्त्रपूजा तथा अन्येषां कृते च तन्त्रपूजा विधीयते । तस्मात् नरैः सप्तस्वपि वारेषु यथाशक्ति देवयजनं कर्त्तव्यमस्ति ।

**बोधप्रश्नः—**

१. देवानां तृप्तये पूजा कतिधा प्रकल्पिता ?

२. कस्मिन् वारे विष्णुं पूजयेत् ?

विद्येश्वरसंहितायाञ्च यजननिमित्तं देश-काल-पात्राणां निरूपणं प्रदत्तं विद्यते । तत्र लिखितं यत् देवयज्ञादिकर्मसु गृहं शुद्धशास्त्रोक्तफलदायकमस्ति । तेषु कर्मसु गोष्ठं दशगुणं फलदायकं, ततो दशगुणं जलतीरं, ततो दशगुणं विल्वतुलस्य श्वस्य मूलकम्, ततो देवालयः दशगुणं फलदायकोऽस्ति । ततो दशगुणं नद्यास्तीरं, ततो दशगुणं सप्तगङ्गातीरं फलदायकमतस्त । एताः नद्यः सप्तगङ्गाः कथिताः-

गङ्गा गोदावरी चैव कावेरी ताम्रपर्णिका ।
सिन्धूश्च सरयू रेवा सप्तगङ्गाः प्रकीर्त्तिताः ।। (शि.पु. १/१५/५)

सप्तगङ्गाया दशगुणमधिकम् अब्धितीरम् । पर्वताग्रे यज्ञसम्पादनं ततो दशगुणमधिकं फलदायकमस्ति । सत्ययुगे यज्ञदानादिकं पूर्णफलं ज्ञेयम् । त्रेतायां त्रिपादं, द्वापरे अर्द्धं, कलौ च एकपादं फलदायकं भवेत् ।

गायत्री गायकं पापात् त्रायते । गायत्रीजपशुद्धो ब्राह्मणः दाने, तपसि. होमे, जपे, पूजायां, सर्वकर्मणि च उपयुक्तः कथ्यते । पतनात् त्रायते इति पात्रम् । अतः शुद्धपूतात्मा ब्राह्मण एव दानस्य योग्यं पात्रम् । तस्मात् श्रेष्ठब्राह्मणमाहूय उपयुक्तकाले स्वेच्छया दानं दद्यात् । तेन सम्पूर्णं फलं प्राप्यते । प्रश्नानन्तरं दत्तं दानं तदर्धं फलदायकम् । सेवकाय दत्तं दानं तत्पादफलदं कथितम् । दीनवृत्तेः जातिमात्रस्य विप्रस्य कृते दानं भूलोके दशवार्षिकं भोगाय फलदायकं भवति ।

बहुमानेनाह्वानम्, अभ्यङ्गं, पादसेवनं, वस्त्र-गन्धदानपूर्वकमर्चनं, घृतयुक्तापूपादिषड्रसयुक्त-भोजनं, ताम्बूलार्पणं, दक्षिणाप्रदानं, नमस्कारः, पश्चात् अनुगमनम् एतद् दशाङ्गकम् अन्नदानं कथितम् । सप्तस्वपि वारेषु दशाङ्गकम् अन्नं दत्वा सर्वमारोग्यादिमश्नुते। केवलं भानुवारे शतेभ्यो विप्रेभ्यो अन्नं दत्त्वा सहस्त्रवर्षमारोग्यं सर्वलोके समश्नुते । विद्यार्थिभिर्नरैः ब्रह्मबुद्ध्या बालकेभ्यः दानं दद्यात् । पुत्रकामार्थिभिः नरैः विष्णुबुद्ध्या यूनां दानं दद्यात् । शिवबुद्ध्या बृद्धेभ्यः ज्ञानार्थिभिः दानं दद्यात् । बुद्धिकामैः नरैः बालिकाभ्यः भारतीबुद्ध्या दानं दद्यात् । भोगकामैः नरैः युवस्त्रीभ्यः लक्ष्मीबुद्ध्या दानं दद्यात् । आत्मार्थिभिः जनैः बृद्धास्त्रीभ्यः पार्वतीबुद्ध्या दानं दद्यात् ।

सर्वाभावे दरिद्रः वाचा कर्मणा वा यजेत् । मन्त्रस्तोत्रजपादिकं वाचिकं यजनमस्ति । तीर्थयात्राव्रताद्यं कायिकं यजनं कथ्यते । प्रत्याश्रयदानं देवतार्पणबुद्ध्या कृत्वा भोगफलं लभेत् । सर्वम् ईश्वरार्पणबुद्ध्या कृत्वा मोक्षफलं लभेत ।

**बोधप्रश्नः—**

१. गायत्रीगायकं कस्मात् त्रयते ?

२. कः दनस्य योग्यं पात्रम् ।

**फलाप्तये पार्थिवपूजननिरूपणम्—**

संसारे मृदादिप्रतिमापूजाऽभीष्टप्रदा कथिता । प्रतिमापूजायां पुरुषाणां नारीणामपि अधिकारः कल्पितोऽस्ति । नद्यां तडागे कूपे वा जलान्तमृदमाहरेत् । गन्धचूर्णेन तत्संशोध्य क्षीरेण च संस्कृत्य प्रतिमां कुर्यात् । अङ्गप्रत्यङ्गकोपेतां माधुर्यसमन्वितां पद्मासनस्थितां प्रतिमां कृत्वा आदरेण पूजयेत् । विघ्नेशादित्यविष्णुनामम्बाया शिवस्य च प्रतिमां कृत्वा तथा च शिवलिङ्गं कृत्वा द्विजः सर्वदा षोडशैरूपचारैश्च पूजयेत् ।

सम्यक् विघ्नेशपूजया भूर्लोकेऽभीष्टमाप्नुयात् । शुक्रवारे, चतुर्थ्यां, सिते श्रावणभाद्रके, भिषगृक्षे आश्विननक्षत्रे धनुमासे विघ्नेशं विधिवद्यजेत् । श्रद्धापूर्वकं देवान् अग्निं च संपूज्य पुत्ररत्नं प्राप्नुयात् । तिथिनक्षत्रयोगेन शिवपूजनं सार्वकामिकं भवेत् । तिथ्यादौ देवपूजा हि नृणां पूर्णफलप्रदा भवेत् । देवकार्ये यदि सा तिथिः मध्याह्ने अस्ति तर्हि उदयव्यापिनी ग्राह्या।

पूर्वभागः पितृणां तु निशियुक्तः प्रशस्यते ।<br>
परभागस्तु देवानां दिवायुक्तः प्रशस्यते ।। (शि.पु. १/१६/१७)

'पूर्वाह्णो देवानामपराह्णो पितृणाम्' इति श्रुतिवचनमपि समुपलभ्यते ।

**देवपूजनमहत्त्वम्—**

पूर्जायते ह्यनेनेति पूजा । वेदे कथितं यत् यया क्रियया सर्वाभीष्टप्राप्ति भवति सा पूजा अस्ति । तेन कर्मणा पूर्णफलसिद्धिश्च जायते, पूजाशब्दस्य अयमेव लौकिकवैदिकश्च अर्थः लोके प्रसिद्धः । नित्यनैमित्तिककर्मकालान्तरे फलं ददाति, परन्तु स्वनुष्ठितं काम्यकर्म सद्यः फलदं भवति । कृषणपक्षके चतुर्थ्यां महागणपतेः पूजा पक्षपापक्षयकारी पक्षभोगफलप्रदा च ज्ञेया । चैत्रे चतुर्थ्यां कृष्णपक्षके महागणपतेः पूजा मासफलप्रदा, तथा सिंहभाद्रवे वर्षभोगप्रदा ज्ञेया । माघशुक्ले सप्तम्याम् आदित्ययजनं चरेत् । ज्येष्ठभाद्रकसौम्ये द्वादश्यां श्रवणानक्षत्रे विष्णुयजनं सर्वसम्पत्करम् विदुः । श्रावणे विष्णुपूजनम् इष्टारोग्यप्रदं भवेत् । द्वादश्यां विष्णोः द्वादशनामतः द्वादशविप्रान् पूजयित्वा तत्प्रीतिमाप्नुयात् । एवं च सर्वदेवानां द्वादशनामवैः

द्वादशब्रह्मपूजनं तत्तत्प्रीतिकरं भवेत् । कर्कटे सोमवारे मृगशीर्षके नवम्यां भूतिकाम अम्बां यजेत् । आश्विनशुक्लनवम्याम् आदिवारे चतुर्दश्यां विशेषत आद्रायां कृष्णपक्षे शिवपूजा विशिष्यते । माघकृष्णचतुर्दश्यां शिवपूजा विशिष्यते । ज्येष्ठमासे महाद्रायां चतुर्दशीदिने षोडशोपचारकै शिवस्य पूजनं नृणां भोगमोक्षप्रदं ज्ञेयम् । कार्त्तिके मासि बुधः सर्वान् देवान् यजेत । तेन व्याधीनां हरणं तथा भूतग्रहक्षयः भवेत् । कृत्तिकायां सोमवारेषु शिवस्य पूजनं महादारिद्र्यशमनं सर्वसम्पत्करं भवेत् । कृत्तिकायां भौमवारेषु स्कन्दस्य पूजनात् तथा दीपघण्टादि-दानात् अचिरात् वाक्सिद्धि भवेत् । कृत्तिकायां सौम्यवारेषु विष्णोः पूजनं दध्योदनस्य च दानं सत्सन्तानकरं भवेत् । धनुर्मासे निराहारः मासमात्रं जितेन्द्रियः सन् विप्रः वेदमातरं गायत्रीं जपेत् । स विप्रः ज्ञानं लब्ध्वा मुक्तिमवाप्नुयात् ।

**बोधप्रश्नः—**

१. का पूजा कथिता ?

२. कदा विष्णुयजनं सर्वसम्पत्कारं विदुः ?

**महानैवेद्यम्—**

शालितण्डुलभारेण मरीचपृथुकेन मध्वाज्यकुडवेन द्रोणयुक्तेन मुद्गेन द्वादशव्यञ्जनेन घृतपक्वैरपूपैः मोदकैः शालिकादिभिः द्वादशैः दधिक्षीरैर्द्वादशप्रस्थकेन नारिकेलफलैः द्वादशक्रमुकैर्युक्तं षट्त्रिंशत्पत्रकैर्युतं कर्पूरखरचूर्णेन पञ्चसौगन्धिकैर्युतं ताम्बुलयुक्तञ्च नैवेद्यं महानैवेद्यमुच्यते । महानैवेद्यस्य महत्त्वं यथा विद्येश्वरसंहितायाम्–

महानैवेद्यदानेन सहस्रेण द्विजर्षभाः ।
सत्यलोके च तल्लोके पूर्णमायुरवाप्नुयात् ।।
सहस्राणां च त्रिंशत्या महानैवेद्यदानतः ।
तदूर्ध्वलोकमाप्यैव न पुनर्जन्मभाग् भवेत् ।

**जन्मनैवेद्यम्—**

षट्त्रिंशत्सहस्रनैवेद्यं जन्मनैवेद्यं कथितम् । तावन्नैवेद्यदानं तु महापूर्णं कथ्यते। महापूर्णस्य नैवेद्यं जन्मनैवेद्यमिष्यते । जन्मनैवेद्यदानेन पुनर्जन्म न विद्यते । उर्जे मासि (कार्त्तिके) पुण्ये दिने जन्मनैवेद्यमाचरेत् । तथा च सङ्क्रान्तिपातजन्मर्क्षे पौर्णमास्यादिसंयुते

अब्दजन्मदिने उत्तमं जन्मनैवेद्यं कुर्यात् । मासान्तरेषु जन्मर्क्षपूर्णयोगदिने शनिमहादशायाञ्च जन्मनैवेद्यसाहस्रमाचरेत् । जन्मनैवेद्यदानेन जन्मार्पणफलं लभेत । जन्मनैवेद्यार्पणाच्छिव: प्रीतं सन् स्वसायुज्यं ददाति । योनिलिङ्गस्वरूपेण शिव: जन्मनिरूपक: कथित: । अत: जन्मनिवृत्यर्थं शिवाय जन्मपूजा विधीयते ।

**विन्दुनादात्मकं तत्त्वम्—**

स्थावरजङ्गमात्मकं सर्वं जगत् विन्दुनादात्मकमस्ति । विन्दु: शक्ति: तथा शिव: नाद: कथ्यते । नादाधार: विन्दु:, विन्द्वाधारमिदञ्च जगत् अस्ति । जगदाधारभूतौ विन्दुनादौ व्यवस्थितौ । विन्दुनादयुतं सर्वं सकलीकरणं भवेत् । सकलीकरणात् जगत् जन्म प्राप्नोति । विन्दुनादात्मकं लिङ्गं जगत्कारणमुच्यते । विन्दुर्देवी, शिवो नाद: । बिन्दुनादात्मकं शिवलिङ्गं कथ्यते । तस्माज्जन्मनिवृत्यर्थं शिवलिङ्गं प्रपूजयेत् । बिन्दुरूपा देवी माता, नादरूप: शिव: पिता । तस्मात् परमानन्दलाभार्थं शिवलिङ्गं प्रपूजयेत् । सा देवी जगतां माता, स शिवो जगत: पिता । नित्यं पित्रो: शुश्रूषके तयो: कृपाधिक्यं वर्द्धते ।

**प्रणवपञ्चाक्षरमन्त्रमाहात्म्यम्—**

प्रणवशब्दस्य व्युत्पत्ति: विद्येश्वरसंहितायां सुष्ठुरूपेण निरूपितं विद्यते । तद्यथा-

प्रो हि प्रकृतिजातस्य संसारस्य महोदधे: ।
नवं नावान्तरमिति प्रणवं वै विदुर्बुधा: ।।
प्र: प्रपञ्चो न नास्ति वो युष्माकं प्रणवं विदु: ।
प्रकर्षेण नयेत् यस्माद् मोक्षं व: प्रणवं विदु: ।।

संसारसागरात् निवृत्तिं प्राप्तुं प्रणव: नावसदृश: । प्रणवजपेन संसारचक्रं नश्यति मोक्षश्च सुलभायते ।

प्रणव: द्विविध: प्रोक्त: । १. सूक्ष्म:, २. स्थूलश्च । सूक्ष्म एकाक्षर: तथा स्थूल: पञ्चाक्षर: तथा स्थूल: पञ्चाक्षरसंयुक्तश्चास्ति । जीवन्मुक्तस्य कृते सूक्ष्मो हि सर्वसार: निगदित:। साधक: स्वदेहविलयावधि मन्त्रेणार्थानुसन्धानं कुर्यात् । षट्त्रिंशत्कोटिप्रणवजापी निश्चयं योगमाप्नुयात् । ह्रस्व-दीर्घविभेदत: सूक्ष्मो द्विविधोऽस्ति । अकार: उकार: मकारश्च बिन्दुनादयुत: सन् दीर्घप्रणव: कथ्यते । तदेव योगीनां हृद्देशे भासते । परन्तु केवलं मकारान्त: (अ,उ,म) ह्रस्वप्रणव उच्यते । सर्वपापक्षयैषिणां कृते ह्रस्व: प्रणव: जाप्येऽस्ति । प्रवृत्तानां कृते ह्रस्वप्रणव:

तथा निवृत्तानां कृते दीर्घप्रणवः फलदायकोऽस्ति । व्याहृत्यादौ, मन्त्रादौ वेदादौ, सन्ध्यावन्दने प्रणवः प्रयोज्यः स्यात् । नवकोटिप्रणवं जप्त्वा पुरुषः संशुद्धो भवेत् । नवकोटिप्रणवजपेन पृथिवीजयमाप्नुयात् । नवकोटि-प्रणवजपेन ह्यपां जयमवाप्नुयात् । नवकोट्या तेजसां जयमवाप्नुयात् । नवकोट्या तु वायोर्जय-मवाप्नुयात् । नवकोटिप्रणवजपेन वायोर्जयमवाप्नुयात्। नवकोटिजपेन आकाशस्य च जयमाप्नोति । पुनश्च क्रमेण नवकोटिजपेन गन्धादीनां जयमाप्नुयात्। पुनर्नवकोटिजपेन अहङ्कारस्य जयमाप्नुयात् । सहस्रमन्त्रजपेन पुमान् नित्यशुद्धो भवेत् । एवमष्टोत्तरशतकोटिजपेन प्रबुद्धस्तु शुद्धयोगमवाप्नुयात् । शुद्धयोगेन संयुक्तः पुरुषो जीवन्मुक्तो भवेदिति न संशयः । ऋषिच्छन्दो-देवतादि देहे न्यस्य पुनर्जपेत् । मातृकायुक्तं प्रणवं देहे न्यस्य ऋषिर्भवेत् ।

**बोधप्रश्नः-**

१. प्रणवः कतिविधः ?

२. निवृत्तानां कृते कीदृशः प्रणवः फलदायकोऽस्ति ?

**शिवयोगिनः—**

शिवयोगिनः त्रिविधाः सन्ति । (१) क्रियायोगी= धनादिविभवदानेन, कराद्यङ्गैर्नम आदिभिः, पूजया क्रियया च युक्तः योगी क्रियायोगी कथ्यते । (२) तपोयोगी= पूजायुक्तः मितभुग् बाह्येन्द्रियजयान्वितः परद्रोहादिरहितः साधकः तपोयोगीति कथ्यते । (३) जपयोगी= सर्वकामादिवर्जितः सदा शुद्धः सदा जपपरः शान्तो जपयोगीति कथ्यते । क्रियायोगिनां षोडशोपचारपूजाभिः नरः सालोक्यं मुक्तिं लभेत । तपोयोगिनां पूजया सामीप्यं तथा जपयोगिनां पूजया सायुज्यं प्राप्यते ।

जपयोगः- शिवपञ्चाक्षरं स्थूलप्रणवरूपं ज्ञेयम् । पञ्चाक्षरजपेन नरः सर्वसिद्धिं लभेत । प्रणवेनादिसंयुक्तं पञ्चाक्षरं सदा जपेत् । पञ्चाक्षरजपारम्भनिमित्तं माघः भाद्रश्च विशिष्टौ कथितौ । एकवारं मिताशी नियतेन्द्रियः सहस्रजपमात्रेण शुद्धो भवेत् । शिवमनुस्मरन् पञ्चलक्षं पञ्चाक्षरं जपेत् । शुद्धकर्मकृत् नरः मनोरमे शुचौ देशे नियतः शुद्धमानसः सन् प्रातः कृष्णचतुर्दश्यां नित्यकर्म समाप्य पञ्चाक्षरीं विद्यां जपेत् । सपत्नीकान् शैवब्राह्मणान् वरयेत् । एकं सांबमूर्त्तिकं गुरुवरं च वरयेत् । ईशानम् अथवा अघोरं वामदेवम् अथवा सद्योजातम् एतादृशान् पञ्चैव

शिवभक्तान् द्विजोत्तमान् वरयेत् । ततो पूजाद्रव्याणि सम्पाद्य शिवपूजां समारभेत् । विधिवत् शिवपूजां कृत्वा होमं समारभेत् । होमान्ते गुरवे गोमिथुनं दक्षिणा देया । ईशानादिस्वरूपाणां तेषां ब्राह्मणानां पत्सिक्ततोयेन स्वशिरः स्नानमाचरेत् । तेभ्यः दशाङ्गमन्नं दद्यात् । पराबुद्ध्या गुरो पत्नी अर्चनीया । परान्नेन तान् सर्वान् सम्पूज्य वस्त्रादिकं समर्पयेत् । ततः बलिदानं कृत्वा भूरिभोजनमाचरेत् । ततः देवेशं सम्प्रार्थ्य तावत् जपं समापयेत् ।

**बन्धमोक्षरूप-शिवलिङ्ग-माहात्म्यम्—**

प्रकृत्याद्यष्टबन्धेन बद्धः आत्मा जीवसंज्ञां लभते । प्रकृत्यादि अष्टबन्धेभ्यो निर्मुक्त आत्मा मुक्त उच्यते । अग्रे प्रकृतिः, ततो बुद्धिः, ततो गुणात्मकाऽहङ्कारः, पञ्चतन्मात्राणि चैतत् प्रकृत्याद्यष्टकं विदुः । प्रकृत्याद्यष्टजः देहः । देहजं कर्म उच्यते । पुनश्च कर्मजो देहः । एवं प्रकारेण जन्मकर्म पुनः पुनः प्रचलति ।

स्थूलं, सूक्ष्मं तथा कारणभेदेन शरीरं त्रिविधम् । स्थूलं क्रियात्मकं प्रोक्तम् । इन्द्रियभोगदं सूक्ष्मं तथा आत्मभोगार्थं कारणशरीरमुद्दिष्टमिति निरूपितम् । जीवः कर्मानुसारतः पुण्यपापैः कर्मभिः सुखं दुःखं फलमश्नुते । कर्मरज्ज्वाबद्धो जीवः पुनः पुनः चक्रवद् भ्राम्यते । तस्मात् चक्रभ्रमनिवृत्त्यर्थं चक्रकर्त्तारमीडयेत् । यतः महेशः प्रकृतेः परतः तिष्ठति, स प्रकृतिं बालो जलं यथा पिबति अथवा वमति तथा वशीकृत्य अधितिष्ठति ।

सर्वं वशीकृतं यस्मात् तस्माच्छिव इति स्मृतः ।
शिव एव हि सर्वज्ञः परिपूर्णश्च निःस्पृहः ।। (शि.पु. १/१८/११)

अतः शिवप्रसादेन प्रकृत्यादि वशं भवेत् । शिवप्रसादलाभार्थं शिवमेव प्रपूजयेत् । शिवभक्तजनः लिङ्गे बेरे च शिवमुद्दिश्य कायेन मनसा वाचा धनेनापि प्रपूजयेत् । पूजया हि प्राकृतेः परमः शिवः प्रसादं कुरुते । शिवप्रसादार्थं शिवक्रिया शिवतपः शिवमन्त्रजपः शिवज्ञानं शिवध्यानञ्च उत्तरोत्तरमभ्यसेत् ।

**लिङ्गभेदः—**

लिङ्गानां च क्रमं वक्ष्ये यथावच्छृणुत द्विजाः ।
तदेव लिङ्गं प्रथमं प्रणवं सार्वकालिकम् ।।
सूक्ष्मप्रणवरूपं हि सूक्ष्मरूपं तु निष्कलम् ।
स्थूललिङ्गं हि सकलं प्रपञ्चाक्षरमुच्यते ।।

स्वयम्भूलिङ्गं प्रथमं विन्दुलिङ्गं द्वितीयकम् ।
प्रतिष्ठितं चरं चैव गुरुलिङ्गं तु पञ्चमम् ।।

स्थावराङ्कुरवद् भूमिमुद्भिद्यय व्यक्तं स्वयंभूतं जातमिति स्वयंभूलिङ्गं कथितम् । तल्लिङ्गपूजया ज्ञानं स्वयमेव प्रवर्द्धते । सुवर्णरजातादौ पृथिव्याम् अथवा स्थण्डिले शुद्धप्रणवमन्त्रकं यन्त्रलिङ्गं समालिख्य प्रातिष्ठाऽऽवाहनं चरेत् । तदेव लिङ्गं बिन्दुनादमयं लिङ्गं कथ्यते । एतद्धि भावनामयं लिङ्गमस्ति । यत्र विश्वास: विद्यते तल्लिङ्गं फलदायकं भवेत् । शुद्धभावनया स्थापितं लिङ्गं पौरुषं प्राकृतञ्च लिङ्गं कथ्यते । देवै: ऋषिभि: आत्मसिद्ध्यर्थं शुद्धभावनया स्थापितं लिङ्गम् उत्तमलिङ्गमस्ति । तल्लिङ्गं पौरुषं प्रतिष्ठितञ्च लिङ्गंकथ्यते । तल्लिङ्गपूजनेन पौरुषेश्वर्यमाप्नुयात् । महद्भि: ब्राह्मणै: राजभि: महाधनै: नरै: शिल्पिना कल्पितं मन्त्रेण स्थापितं च लिङ्गं सम्पूज्य ऐश्वर्यं भोगं च प्राप्नुयात् । तल्लिङ्गं प्रावृतं प्रतिष्ठितञ्च लिङ्गं कथ्यते । नाभि: जिह्वा नासाग्रशिखाक्रमात् कट्यादिषु युक्तं लिङ्गम् आध्यात्मिकं चरञ्च लिङ्गं कथ्यते ।

**बोधप्रश्न:—**

१. क: मुक्त: उच्यते ?

२. शिवयागिन: कतिविधा: सन्ति ?

चरलिङ्गेषु रसलिङ्ग ब्राह्मणानां कृते सर्वाभीष्टप्रदं भवेत् । क्षत्रियाणां कृते बाणलिङ्गं महाराज्यप्रदं शुभं चास्ति । वैश्यानां कृते स्वर्णलिङ्गं धनदमस्ति । शूद्राणां कृते शिलालिङ्गं महाशुद्धिकरं शुभदञ्चास्ति । स्फाटिकं वाणलिङ्गं सर्वेषां सर्वकामदमस्ति । अन्यदीयं लिङ्गं पूजायां न निषिद्ध्यते । निवृत्तानां विधवानां कृते रसलिङ्गं, सधवास्त्रीणां कृते पार्थिवलिङ्गञ्चं विशिष्यते । शिवपूजाविषये योग्यमुपदेशं गृहीत्वा अभिषेकात् शाल्यन्नं निवेदनं यावत् सर्वं पूजाविधानमनुसृत्य शिवं पूजयेत् । पूजान्ते लिङ्गं सम्पूटे संस्थाप्य पृथग् गृहे स्थापयेत् । निवृत्तानां कृते सूक्ष्मं लिङ्गं विशिष्यते । सूक्ष्मं लिङ्गं विभूतिभि: अर्चयेत् विभूतिञ्च निवेदयेत् । ज्ञानयुक्तगुरो: शरीरं गुरुलिङ्गं भवेत् । गुरुशुश्रूषणं तु गुरुलिङ्गस्य पूजा भवेत् । गुरुपूजाया: महत्त्वं यथा विद्येश्वरसंहितायाम्–

गुरुपूजैव पूजा स्याच्छिवस्य परमात्मन: ।
गुरुशेषं तु यत्सर्वमात्मशुद्धिकरं भवेत् ।।

गुरोः शेषः शिवोच्छिष्टजलमन्नादिनिर्मितम् ।

शिष्याणां शिवभक्तानां ग्राह्यं भोज्यं भवेद् द्विजाः ।।

इत्थं वर्णानुसारतः सौविध्यानुसारतः शक्त्यनुसारतः शिवलिङ्गं प्रतिष्ठापयेत् । षोडशोपचारैश्च पूजयेत् । पूजान्ते प्रदक्षिणं नमस्कारं च कुर्यात् । प्रदक्षिणनमस्कारौ शिवस्यातिप्रियौ विद्यात्। प्रदक्षिणनमस्कारैः शिवपूजा फलप्रदा भवेत् । शिवपूजापरो नरः मौनी सत्यादिगुणसंयुतः क्रिया-तपो-जप-ज्ञान-ध्यानेष्वेकैकमाचरेत् ।

## सारांशः

अग्नेः उपासना ब्राह्मणानां कृते अवश्यं करणीयाऽस्ति । स अग्नौ यत् जुहोति सोऽस्ति अग्नियज्ञः । ब्राह्मणः केनापि प्रकारेण अग्नियज्ञं कुर्यात् । अग्नेः त्यागं कदापि न कुर्यात् । स च इन्द्रादीन् देवानुद्दिश्य यः यज्ञः करोति तदस्ति देवयज्ञः । वेदाध्ययनादिकं ब्राह्मणानां कृते ब्रह्मयज्ञः कथ्यते । देवतानां तृप्तये ब्राह्मणः यज्ञः कुर्यात् । शास्त्रानुसारं यज्ञनिमित्तं स्थानं कालञ्च निरूपयेत् ।

फलकामो नरः फलाप्तये वर्णानुसारं कालानुसारं फलानुसारञ्च शिवलिङ्गं पूजयेत् । स्थावरजङ्गमात्मकं सर्वं जगत् बिन्दुनादात्मकमस्ति । शिवः नादः तथा विन्दुः शक्तिः कथ्यते। तौ च बिन्दुनादौ पार्वतीपरमेश्वरौ स्तः । जन्ममरणनिवृत्तिनिमित्तं शिवलिङ्गं प्रपूजयेत् ।

प्रकृत्यादि अष्टबन्धेन बद्धः आत्मा जीवसंज्ञां लभते । कर्मरज्वा बद्धो जीवः पुनः पुनः चक्रवद् भ्राम्यते । तस्मात् चक्रभ्रमनिवृत्यर्थं चक्रकर्त्तारं शिवं प्रणवयुक्तापञ्चाक्षरेण पूजयेत् ।

## आदर्शप्रश्नाः

**लघूत्तरीयाः प्रश्नाः—**

१. फलाप्तये पार्थिवपूजनम् लिखत ।

२. दैवयज्ञःलिखत ।

३. महानैवेद्यम् लिखत ।

४. जन्मनैवेद्यम् लिखत ।

५. बिन्दुनादात्मकं तत्त्वम् लिखत ।

**विश्लेषणात्मकाः प्रश्नाः—**

१. देवपूजनमहत्त्वं निरूपयत ।

२. शिवयोगं विशदयत ।

३. लिङ्गभेदं लिखत ।

**निबन्धात्मकाः प्रश्नाः -**

१. विद्येश्वरसंहितायां प्रदत्तं यज्ञतत्त्वं वर्णयत ।

२. बन्धमोक्षरूपशिवलिङ्गमाहात्म्यं प्रकाशयत ।

३. प्रणवपञ्चाक्षरमन्त्रमाहात्म्यं विशदयत ।

**एकाङ्कप्रश्नाः—**

१. देवानां तृप्तये प्रचलिता पूजा कतिधा ?

२. सायमग्न्याहुतिः किमस्ति ?

३. विद्यार्थिभिः नरैः केभ्यः दानं प्रदेयम् ?

४. दरिद्रः कथं यजेत् ?

५. कति नैवेद्यं जन्मनैवेद्यं कथ्यते ?

६. कस्मिन् शिवाशिवयोः कृपाधिक्यं वर्द्धते ?

७. संसारसागरात् निवृत्तिं प्राप्तुं किं नावसदृशमस्ति ?

८. कति प्रणवं जप्त्वा पुरुषः संशुद्धः भवेत् ?

९. पराबुद्ध्या का अवर्चनीया ?

१०. कर्मजः कः कथ्यते ?

११. केषां कृते जागलिङ्गं शुभङ्करमस्ति ?

**उत्तराणि—**

१. पञ्चधा, २. सम्पत्करी, ३. बालकेभ्यः, ४. वाचा अथवा कर्मणा, ५. षट्त्रिंशत्सहस्राणि, ६. पित्रोः शुश्रूषके, ७. प्रणवः, ८. नवकोटिप्रणवम्, ९. गुरोः पत्नी, १०देहः, ११. क्षत्रियाणाम् ।

—०—

## दशमोऽंशः

**प्रस्तावना—**

शिवपुराणस्य विद्येश्वरसंहितायां शिवतत्त्वं बहुभावेन निरुपितं वर्त्तते । प्रस्तुतपाठ्यक्रमस्यास्मिन् अंशे शैवतत्त्वस्य प्रमुखाविषयाः चार्च्चिता सान्ति । वैदिकपुराणोक्तविधिना शिवपूजनं शिवभक्तानां कृते अतीव महत्त्वपूर्णं विद्यते । भस्मतत्त्वे भस्मभेदः, भस्मधारणविधिः भस्ममाहात्म्यञ्च विद्येश्वरसंहितायाः निजस्वं वैशिष्ट्यमभिव्यञ्जयति। रुद्राक्षस्य च सम्पूर्णं विवरणम् अत्रैव प्रदत्तमस्ति । रुद्राक्षधारणविधिः, रुद्राक्षभेदाः रुद्राक्षमाहात्म्यं च शैवतत्त्वस्य महत्त्वं सूचयति । शिवनैवेद्यस्य, विल्वपत्रस्य, शिवनाम्नश्च माहात्म्यमत्र सुष्ठु निरूपितमस्ति ।

**उद्देश्यम्—**

विद्येश्वरसंहिताया अस्मिन् अंशे वयं एतान् विन्दून् आलोचयिष्यामः ।

- वैदिकपुराणोक्तविधिना शिवपूजनम् ।
- भस्मतत्त्वम् ।

  १. भस्मभेदः, २. भस्मधारणविधिः, ३. भस्ममाहात्म्यम् ।
- रुद्राक्षतत्त्वम् ।

  १. रुद्राक्षभेदाः, २. रुद्राक्षधारणविधिः, ३. रुद्राक्षमाहात्म्यम् ।
- शिवनैवेद्यमाहात्म्यम् ।
- विल्वपत्रमाहात्म्यम् ।
- शिवनाम्नः माहात्म्यम् ।

**वैदिकपुराणोक्तविधिना पार्थिवपूजनविधानम्-**

पौराणिकोत्तमः सूतदेवः शिवभक्तानां कृते वैदिकं शिवपूजनविधानं निम्नोक्तप्रकारमवर्णयत् । तेनोक्तं यत् वैदिकेन मार्गेण शिवपूजनं भुक्तिमुक्तिप्रदायकमस्ति। वैदिकशाखासूत्रानुसारं स्नात्वा यथाविधि संध्यां कृत्वा ब्रह्मयज्ञं विधाय आदौ तर्पणमाचरेत् । तदनन्तरं सकलं नैतिकं विधाय पुनश्च भस्मरुद्राक्षञ्च धारयित्वा परया भक्त्या उत्तमं पार्थिवं लिङ्गं पूजयेत् । नदीतीरे, तडागे, पर्वते, कानने, शिवालये अथवा शुचौ देशे पार्थिवार्चापूजनं

विधीयते । शुद्धप्रदेशसम्भूतां मृदं यत्नत आहृत्य द्विजा: सावधानतया शिवलिङ्गं प्रकल्पयेयु: । विप्रे गौरा क्षत्रिये शोणा वैश्ये पीतवर्णका शुद्रे च कृष्णा अर्चा फलदायकाऽस्ति । लिङ्गनिर्माणार्थं मृत्तिकां संगृह्य अतीव शुभदेशे तां स्थापयेत् । मृत्तिकां जलेन संशोध्य शनै: शनै: पिण्डीकृत्य वैदिकमार्गत: शुभं लिङ्गं स्थापयेत् । भुक्ति-मुक्तिफलाप्तये ततो भक्त्या संपूजयेत् । 'नम: शिवाय' मन्त्रेण अर्चनद्रव्यं प्रोक्षयेत् । 'भूरसीति' मन्त्रेण क्षेत्रसिद्धिं प्रकारयेत् । 'आपोऽस्मानिति' मन्त्रेण जलसंस्कारमाचरेत् । 'नमस्ते रुद्र:' इति मन्त्रेण फाटिकाबन्धं कुर्यात् । 'सम्भवाय नम:' मन्त्रेण क्षेत्रशुद्धिं प्रकारयेत् । 'नम: पूर्वेण' इति मन्त्रेण पञ्चामृतस्यापि प्रोक्षणं कुर्यात्। 'नमो नीलग्रीवाय' तथा च 'नम: पूर्वेण' मन्त्रेण शङ्करलिङ्गस्य प्रतिष्ठापनं कुर्यात् । 'एतत्ते रुद्राय' मन्त्रत: रमणीयम् आसनं दद्यात् । 'मा नो महान्तमिति' मन्त्रेणावाहनं चरेत् । 'या ते रुद्रेण' मन्त्रेण उपवेशनम् सञ्चरेत् । 'यामिषुमिति मन्त्रेण शिवस्य न्यासं कुर्यात् । 'अध्येवोच'दिति मन्त्रेण प्रेम्णा अधिवासम् आचरेत् । 'असौ जीव' इति मन्त्रेण देवतान्यासमाचरेत् । 'असौ योऽवसर्पति' मन्त्रेण उपसर्पणमाचरेत् । 'नमोऽस्तु नीलग्रीवाय' इत्युक्त्वा मनुना पाद्यमाहरेत्। रुद्रगायत्र्या अर्घ्यं, त्र्यम्बकेणाचमनं कुर्यात् । 'पय: पृथिव्याम्' इति मन्त्रेण दुग्धस्नानं, 'दधिक्राब्णो मन्त्रेण दधिस्नानं, 'घृतं याव' मन्त्रेण घृतस्नानं, 'मधुवाता', 'मधुनक्तं', 'मधुमान्नम्' इति मन्त्रं पठित्वा पञ्चामृतस्नानमाचरेत् । अथवा पाद्यमन्त्रेण पञ्चामृतस्नानं समाचरेत् । 'मा न स्तोके' इति मन्त्रेण कटिबन्धनं समर्पयेत् । 'नमो धृष्णवे' इति मन्त्रमुच्चार्य उत्तरीयं धापयेत् ।'या ते हेतिरिति' मन्त्रेण वेदज्ञ: वस्त्रं समर्पयेत् । नम: श्वभ्य: इति मन्त्रेण गन्धं, नमस्तक्षभ्येन अक्षतं समर्पयेत् । 'नम: पार्यायमन्त्रेण पुष्पं, नम: पर्णाय मन्त्रेण विल्वपत्रञ्च समर्पयेत् । नम: कपर्दिने मन्त्रेण धूपं तथा नमऽऽशवे मन्त्रेण दीपं दद्यात् । 'नमो ज्येष्ठाय' मन्त्रेण नैवेद्यं त्र्यम्बकं यजामहे' मन्त्रं पठित्वा चाचमनं कुर्यात् । 'नमो रुद्राय' मन्त्रेण फलं तथा 'नमो व्रज्याय' मन्त्रेण शिवाय सर्वं समर्पयेत् । 'मा नो महान्तम्', मा न स्तोके तनये, इमे मन्त्रौ पठित्वा एकादशाक्षतै: रुद्रान् प्रपूजयेत् । हिरण्यगर्भमन्त्रं पठित्वा दक्षिणां समर्पयेत्। देवस्य त्वेति मन्त्रेण अभिषेकं चरेत् । शम्भो: दीपमन्त्रेण नीराजनविधिं चरेत् । 'नमो रुद्राय' इत्युक्त्वा पुष्पाञ्जलिं चरेत् । 'मा नो महान्तमिति' प्रदक्षिणां चरेत् । मा न स्तोकेति मन्त्रेण साष्टाङ्गं प्रणमेत् । 'एष ते' मन्त्रेण शिवमुद्रां प्रदर्शयेत् । 'नमो गोभ्य' मन्त्रेण धेनुमुद्रां दर्शयेत्। अथ पञ्चमुद्रा: प्रदर्श्या: । शतरुद्रीयमन्त्रेण वेदविचक्षण: जपेत् । तत: पञ्चाङ्गपारुं कुर्यात् । 'देव गात्विति' शम्भोविसर्जनं कुर्यात् ।

**बोधप्रश्नः—**

१. पौराणिकोत्तमः कः ?

२. विप्राणां कृते किं लिङ्गं प्रशस्यते ?

ततः सूतदेवः शिवपूजायाः विधिं समासतः कथितवान् । तेनोक्तं यत् 'सद्योजातं प्रपद्यामि' इति मन्त्रेण मृत्तिकामाहरेत् । वामदेवाय नमः इति मन्त्रेण जलप्रक्षेपमाचरेत् । अघोरेण मन्त्रेण लिङ्गनिर्माणमाचरेत् । तत्पुरुषाय मन्त्रेणाह्वानं कुर्यात् । वेदिकायाम् ईशानमन्त्रेण हरम् संयोजयेत् । अन्यत् सर्वं विधानं सुधीः संक्षेपतः कुर्यात् ।

**भस्मतत्त्वम्—**

रुद्राग्निर्यत्पर वीर्यन्तद्भस्म परिकीर्त्तितम् ।
तस्मात्सर्वेषु कालेषु वीर्यवान्भस्मसंयुतः ।। (शि.पु.पू. ३३)

शैवमतानुसारम् इदं जगत् अग्निसोमात्मकम् अस्ति । रुद्रस्य तैजसी घोरा तनुः अग्निरित्युच्यते । अमृतमयः शान्तिकरी शाक्तः तनुः सोमेति अभिधीयते । तेजसः द्विविधा वृत्तिः, सूर्यात्मा अनलात्मिका च । तथैव रसवृत्तिश्च द्विविधा, सोमात्मा जलात्मिका च । विद्युदादिमयं तेजः, मधुरादिमयः रसः । तेजोरसविभेदैस्तु एतत् चराचरम् शिवेन धृतमस्ति । कदाचित् अग्निरूपः शिवश्चोर्ध्वं तिष्ठति । सोमरूपा शक्तिः अधः तिष्ठति । कदाचिच्च सोम ऊर्ध्वं तिष्ठति तथा अग्नि अधः ।

अग्निरुर्ध्वं जलत्येष यावत्सौम्यं परामृतम् ।
यावदग्न्यास्पदं सौम्यममृतं च स्त्रवत्यधः ।। (शि.पु. ७.५.२८)

एवं प्रकारेण अग्निसोमात्मकाभ्यां शिवशक्तिभ्याम् इदं जगत् परिव्याप्तम् अस्ति । कदाचित् शिवाग्निना दग्ध्यम् इदं जगत् भस्मसात् भवति । अतः भस्म एव तस्य शिवात्मकस्याग्नेः वीर्यः कथितः ?

असकृच्चाग्निना दग्धं जगद्यभस्मसात्कृतम् ।
अग्नेर्वीर्यमिदं चाहुस्तद्वीर्यं भस्म यत्ततः ।। (शि.पु. ७.५.२८)

इत्थं भस्मसद्भावं ज्ञात्वा यो भस्मना स्नाति, अग्निरित्यादिभिः मन्त्रै अभिमन्त्रितो भवति स मृत्युपाशात् प्रमुच्यते ।

**भस्मभेदः—**

श्रीशिवपुराणे भस्मभेदः सम्यक्तयोपस्थापितं विद्यते । तत्र लिखितं यत् महाभस्म स्वल्पभस्मभेदेन भस्म द्विविधम् । पुनश्च महाभस्म त्रिविधम् यथा- श्रौतं, स्मार्तं, लौकिकञ्च—

एकं ज्ञेयं महाभस्म द्वितीयं स्वल्पसंज्ञकम् ।
महाभस्म इति प्रोक्तं भस्मनानाविधं परम् ।।
तद्भस्म त्रिविधं प्रोक्तं श्रौतं स्मार्त्तं च लौकिकम् ।
भस्मैव स्वल्पसंज्ञं हि बहुधा परिकीर्त्तितम् ।। (शि.पु. १/१३)

द्विजानां कृते श्रौतं तथा स्मार्त्तं भस्म धारणीयम् । अन्येषां सर्वेषां कृते लौकिकं भस्मधारणं विहितम् । द्विजानां कृते मन्त्रतः भस्मधारणं ग्राह्यम् । अन्येषां कृते मन्त्रवर्जितभस्मधारणं विहितमस्ति । स्वल्पभस्म अपि बहुधा कथितम् । परन्तु विद्येश्वरसंहितायां स्वल्पभस्मभेदः न कथितः ।

दग्धगोमयसम्भवं भस्म आग्नेयभस्ममुच्यते । तदपि त्रिपुण्ड्रस्य द्रव्यमित्युक्तम् । अग्निहोत्रोत्थितं भस्म मनीषिभिः सदैव ग्राह्यम् । त्रिपुण्ड्रस्य धारणे अन्ययज्ञोत्थितं भस्म अपि युक्तमस्ति । जाबालोपनिषद्गतैः अग्निरित्यादिभिः सप्तभिः मन्त्रैः सजलेन भस्मना धूलनं कार्यम् । जावालैः वर्णानमाश्रमाणां मन्त्रतः त्रिपुण्ड्रोद्धूलनम् आदरेण प्रोक्तम् ।

मोक्षार्थी प्रमादादपि भस्मना उद्धूलनं तथा तिर्यक् त्रिपुण्ड्रकं न त्यजेत् । शिवेन विष्णुना चैव तिर्यक् त्रिपुण्ड्रं धृतमस्ति । उमादेव्या लक्ष्मीदेव्या तथा अन्याभिश्च देवीभिः त्रिपुण्ड्रं नित्यशः धारणीयमस्ति । ब्राह्मणैः क्षत्रियैर्वैश्यै शूद्रैः तथा अन्यैः वर्णसङ्करजातिभिश्च उद्धूलनं त्रिपुण्ड्रधारणस्य विधानञ्च विहितमस्ति ।

**बोधप्रश्नः—**

१. कः मृत्युपाशात् प्रमुच्यते ?

२. सर्वेषां कृते कीदृशं भस्मधारणीयम् ?

उद्धूलनं त्रिपुण्ड्रं श्रद्धया ये धारयन्ति ते सर्वपापेभ्यः मुच्यन्ते । परन्तु तदपि श्रद्धया ये नाचरन्ति तेषां कोटिजन्मभिः संसारात् मुक्तिः नास्ति । शतकोटिकल्पैरपि तेषां शिवज्ञानं न भवति । ते च महापातकैः युक्ताः भवन्तीति शास्त्रीयनिर्णयः विद्यते । शर्वद्वेषात् महापातकयुक्तानां तेषां सर्वमाचरितं विपरितफलाय भवति ।

**बोधप्रश्नः—**

१. केषां सर्वमाचरितं विपरीतफलाय भवति ?

........................................................................

**भस्ममाहात्म्यम्—**

शिवाग्निकार्यः कृत्वा आत्मवित् नरः भस्मना स्पृष्टः सन् सर्वपापैः मुच्यते । यः सितेन भस्मना त्रिसन्ध्यं त्रिपुण्ड्रकं कुर्यात् स सर्वपापविनिर्मुक्तः सन् शिवेन सह मोदते। भस्मना स्नानं न कृत्वा षडक्षरं मन्त्रं न जपेत् । विधिना भस्मना त्रिपुण्ड्रं रचयित्वा तु जपेत्।

अदयो वाधमो वापि सर्वपापान्वितोऽपि वा ।
उषो पापान्वितो वापि मुर्खा वा पतितोऽपि वा ।।२३
यस्मिन्देशे वसेन्नित्यं भूतिशासनसंयुतः ।
सर्वतीर्थैश्चक्रतुभिः सान्निध्यं क्रियते सदा ।।२४

त्रिपुण्ड्रयुक्तः मनुष्यः सर्वैः सुरासुरैः पूज्यः भवति । पापान्वितः मनुष्योऽपि त्रिपुण्ड्रधारणेन यदा मुक्तिं प्राप्नोति तदा किं पुनः श्रद्धयायुतः शुद्धात्मा ? यस्मिन् देशे भूतिशासनसंयुतः शिवज्ञानि तिष्ठति तस्मिन् स्थाने तीर्थाः समागताः भवन्ति । अत्र बहुना उक्तेन किम् ? बुधैः सदा भस्म धार्यम् । लिङ्गार्चनञ्च सदा कार्यम् । पुनश्च षडक्षरः मन्त्रः जप्य : । ब्रह्मणा विष्णुना अथवा रुद्रेण भस्मधारणमाहात्म्यं परिभाषितुं न शक्यम् । वर्णाश्रमाचारलुप्तः पापीजनोऽपि त्रिपुण्ड्रधारणात् मुच्यते । ये मानवाः भस्मधारणं त्यक्त्वा कर्म कुर्वन्ति तेषां जन्मकोटिभिः संसारात् मुक्तिः नास्ति । मानस्तोकेन मन्त्रेण मन्त्रितं भस्म ब्राह्मणक्षत्रियश्च प्रोक्तेषु अङ्गेषु भक्तिपूर्वकं धारयेत् । वैश्यस्त्र्यम्बकेन तथा शुद्रः पञ्चाक्षरेणाभिमन्त्रितं भस्म धारयेत् । विधवास्त्रीणां कृते भस्मधारणविधिः शूद्रवत् कथितः ।

**बोधप्रश्नः—**

१. मे त्रिपुण्ड्रधारिणः वैश्याः भवन्ति ?

पञ्चब्रह्मादिमनुभिः गृहस्थस्य त्रिपुण्ड्रविधिः विहितः । त्रियंबकेन मनुना ब्रह्मचारिणः विधीयते । अधोरेण मनुना विपिनस्थस्य विधिः निरूपितः । यतिस्तु प्रणवेन एव त्रिपुण्ड्रादीनि कारयेत् । भस्मधारणं सर्ववर्णैः न त्याज्यम् । भस्मधारणस्य माहात्म्यं यथा श्रीशिवपुराणे—

भस्मस्नानेन यावंत: कणा: स्वाङ्गे प्रतिष्ठिता: ।
तावन्ति शिवलिङ्गानि तनौधत्ते हि धारक: ।।३९
ब्राह्मणा: क्षत्रियावैश्या: शूद्राश्चापि च संकरा: ।
स्त्रियोथविधवाबाला: प्राप्ता: पाखण्डिकास्तथा ।।४०
ब्रह्मचारी गृही वन्य: संन्यासी वा व्रती तथा ।
नार्यो भस्मत्रिपुण्ड्रकामुक्ताएवनसंशय: ।।४१

गृही-वनी-पति-यति वर्णसंकरश्चैते भस्मधारणं विना अल्पमपि अन्नं न अश्नीयात् । ये त्रिपुण्ड्रं निन्दन्ति प्रकारान्तरे ते अपि शिवनिन्दका: भवन्ति । अत: भस्मरहितं भालं तथा शिवालयविरहितं ग्रामं धिक् । तथा च निशार्चनं जन्म तथा अशिवाश्रयां विद्याञ्च धिक् । ये त्रिजगतामाधारभूतं महेश्वरं निन्दन्ति तेषां दर्शने दोष: ये त्रिपुण्ड्रं निन्दन्ति तेषां दर्शने अपि दोष:, कथित: । य: भस्मना विधिपूर्वकं त्रिपुण्ड्र कुरुते स महापातकसंघातै: उपपातकैश्च मुच्यते । ब्रह्मचारी, गृहस्थ:, वानप्रस्थ: यति:, ब्राह्मण:, क्षत्रिय:, वैश्य:, शूद्र: अथवा पतिताधमा: एते सर्वे त्रिपुण्ड्रधारणेन शुद्धा: भवन्ति । त्रिपुण्ड्रस्य धारणात् स्त्रीमोहत्यादिपातकै: लिप्त: नर: सद्य एव विमुच्यते । कथ्यते च-

रुद्राक्षं यस्य गात्रेषु ललाटे च त्रिपुण्ड्रकम् ।
स चाण्डालोपि संपूज्यस्सर्ववर्णोत्तमोत्तम: ।। (शि.पु. १/२३)

शैववैकल्यहेतव: कोटिशो मन्त्रा: अन्यदेवानां च ये सौख्यकरा मन्त्रा: ते सर्वे मन्त्रा: त्रिपुण्ड्रकधारिण: वश्या: भवन्ति । त्रिपुण्ड्रकृत् सहस्रपूर्वजानानां तथा सहस्रजनयिष्यतां स्ववंशजानां ज्ञातीनाञ्च उद्धार: करोति । स च त्रिपुण्ड्रकृत् इह अखिलान् भोगान् भुङ्क्त्वा जीविता ते मरणं सुखे नैव प्रपद्यते । मरणानन्तरं दिव्यं स्वर्गसुखं भुङ्क्त्वा अन्ते शिवलोकं गच्छति ।

श्राद्धे होमे यज्ञे जपे होमे वैश्वदेवे सुरार्चने ।
धृतत्रिपुण्ड्र: पूतात्मा मृत्युं जयति मानव: ।।७५
सर्वतीर्थेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
तत्फलसमवाप्नोति भस्मस्नानकरोनर: ।।
भस्मस्नानं परं तीर्थं गङ्गास्नानं दिने दिने ।
भस्मरूपी शिव: साक्षाद्भस्म त्रैलोक्यपावनम् ।।७८

**भस्मधारणविधिः—**

श्रीशिवपुराणे विद्येश्वरसंहितायां भस्मधारणस्य विधिः सम्यक्तया वर्णितं विद्यते । तत्र लिखितं यत् भस्मधारणार्थं ललाटादिषु तिस्रारेखा भवन्ति । भ्रुवोर्मध्यं समारभ्य यावत् भ्रुव अन्तो भवेत् तावत् प्रमाणं संधार्यं ललाटे त्रिपुण्ड्रकं भवेत् । मध्यमेनामिकाङ्गुल्यामध्ये प्रतिलोमतः अङ्गुष्ठेन कृता रेखा त्रिपुण्ड्राख्याभिधीयते । तिसृभिः मध्यङ्गुलिभिः यत्नतः भस्मरादाय त्रिपुण्ड्रः भक्त्या धारयेत् । त्रिपुण्ड्रधारणस्थानं तत्र एवं निरूपितमस्ति यत्–

द्वात्रिंत्स्थानकेवार्द्धषोडशस्थानकेपि च ।
अष्टस्थाने तथा चैव पञ्चस्थानेऽपि नान्यसेत् ।।
उत्तमाङ्गे ललाटे च कर्णयोनेत्रयोस्तथा ।
नासावक्त्रगलेष्वेवंहस्तद्वयः अतः परम् ।।
कुर्परेमणिबंधे च हृदये पार्श्वयोद्वयोः ।
नाभौमुष्कद्वये चैव मूर्वोर्गुल्फे च जानुनि ।।
जङ्घद्वये पदद्वन्द्वे द्वात्रिंशस्थानमुत्तमम् ।।

त्रिपुण्ड्रं द्वात्रिंशत्स्थानेषु, षोडशस्थानेषु, अष्टस्थानेषु, पञ्चस्थानेषु वा कुर्यात् ।

देशकालाद्यपेक्षया भस्मवित् जनाः भस्मधारणे स्थान प्रपञ्चकं मुख्यमिति प्राहुः । तद्यथा–

अथवा मस्तकं बाहुहृदयं नाभिरेव च ।
पञ्चस्थानान्यमून्याहुधारणे भस्मविज्जनाः ।।

यथासम्भवं भस्मधारणं कुर्यात् । उद्धूलने यदि असमर्थः तर्हि त्रिपुण्ड्रकं कुर्यात् । नमः शिवाय इति उक्त्वा ललाटे, ईशानाभ्यां नमः इति उक्त्वा पार्श्वयोः त्रिपुण्ड्रकं कुर्यात् । वीजाभ्यां नम इत्युक्त्वा अधोः प्रकोष्ठयोः त्रिपुण्ड्रं धारयेत् । पितृभ्यामुमेशाभ्याम् उक्त्वा उपरि, भीमायेति उक्त्वा ततः शिरसः तथा पश्चिमे कारयेत् ।

**रुद्राक्षतत्त्वम्—**

परमपावनं रुद्राक्षं शिवस्य प्रियतमं वस्तु अस्ति यस्य दर्शनात्स्पर्शनाज्जाप्यात्सर्वपापः नश्यति । रुद्राक्षस्योत्पत्ति तथा माहात्म्यविषये शिवपुराणे वर्णितं यत् पुरा भक्तानां हितकाम्यया तपसा परमेश्वर शिवस्य दिव्यवर्षसहस्राणि व्यतीतानि अभवन् । ततः तेन चक्षुरुन्मीलितम् । तदा तस्य चारुचक्षुर्भ्यां जलविन्दवः अपतन् । ते अश्रुविन्दवः पतित्वा रुद्राक्षसंज्ञकाः वृक्षाः अभवन् । भक्तानुग्रहकारणात् तस्य अश्रुविन्दवः रुद्राक्षवृक्षत्वं प्राप्ताः । ते वृक्षाश्च

मथुरायामयोध्यायामलकायां, मलये, सह्याद्रौ, काश्यां तथा अन्येषु च स्थलेषु सम्भूता: अभवन्। जातिधर्मवर्णनिर्विशेषेण सर्वे रुद्राक्षं धारयितुं समर्था: सन्ति । परन्तु वर्णानुसारं रुद्राक्षधारणं श्रेयस्करं विद्यते । ब्राह्मणानां कृते श्वेतवर्णरुद्राक्षं, क्षत्रियाणां कृते रक्तवर्णरुद्राक्षं, वैश्यानां कृते पीतवर्णरुद्राक्षं तथा शूद्राणां कृते कृष्णवर्णं रुद्राक्षम् उपादेयमस्ति । रुद्राक्षाणां मध्ये धात्रीफलप्रमाणं रुद्राक्षं श्रेष्ठं विद्यते । वदरीफलप्रमाणं रुद्राक्षं मध्यमफलदायकमस्ति । चणकमात्रं तद् रुद्राक्षम् अधमं परिगण्यते । धात्रीफलप्रमाणं रुद्राक्षं सर्वारिष्टविनाशनमस्ति । गुञ्जाफलसदृशं तत्सर्वार्थफलप्रदमस्ति । रुद्राक्षं यथायथा लघु स्यात् तथाधिकफलप्रदं भवति । पापनाशनहेतवे रुद्राक्षधारणं कुर्यात् । रुद्राक्षमालिका यथा शुभदा अन्या मालिका न तथा । रुद्राक्षा: भुक्तिमुक्तिप्रदा: कामदाश्च सन्ति ।

कृमिदुष्टं, छिन्नभिन्नं, कण्टकैर्हीनं, व्रणयुक्तमवृत्तं च रुद्राक्षं वर्जयेत् । स्वयमेव कृतद्वारं रुद्राक्षम् उत्तमं, यत्नेन कृतद्वारं रुद्राक्षं मध्यमं कथ्यते ।

**बोधप्रश्न:—**

१. कीदृशं रुद्राक्षं वर्जयेत् ?

२. अश्रुविन्दव: पतित्वा के अभवन् ?

**रुद्राक्षधारणविधि:—**

रुद्राक्षधारणप्राप्तं महापातकनाशनम् ।
रुद्रसंख्याशतं धृत्वा रुद्रोरूपो भवेन्नर: ।।२४
एकादशशतानीह धृत्वा यत्फलमाप्यते ।
तत्फलं शक्यते नैव वक्तुं वर्षशतैरपि ।।२५
शतार्द्धेनयुते: पञ्चशतैर्वै मुकुटं मतम् ।
रुद्राक्षौर्विरचेत्सम्यग्भक्तिमाप्नुरुषो पर: ।।२६
त्रिभि: शतै: षष्टियुक्तैस्त्रिरावृत्त्या तथा पुन: ।
रुद्राक्षैरुपवीतं च निर्मीयाद्भक्तिततत्पर: ।।२७

शिखायां रुद्राक्षत्रयं धारयेत् । कर्णयो: षट् च षट् च रुद्राक्षा: धारणीया: । कण्ठे एकोत्तरशतं वाह्वो: रुद्रसंख्यका: रुद्राक्षा: धारणीया: । कूर्परद्धारयो: मणिबन्धे तथा उपवीते त्रय धार्यम् । कटौ पञ्च धारयेत् । एतत्संख्याका: रुद्राक्षा: येन धृता: भवन्ति स एव नर: महेशवत् प्रणम्यं स्तुत्यञ्च भवति।

शतादिकसहस्रस्य विधिरेष प्रकीर्त्तितः ।

तदभावे प्रकारोऽन्यः शुभः संप्रोच्यते मया ।।३३

शतादिकसहस्ररुद्राक्षाभावे शिखायामेकरुद्राक्षं शिरसा च त्रिंशत् वहेत् । पञ्चाशच्च गले दध्यात् । वाह्वोः षोडशः षोडशः धारयेत् । मणिबन्धे द्वादशः, द्वयोः स्कन्धयोः पञ्चशतं वहेत् । अष्टोत्तरशतैर्माल्य-मुपवीतं प्रकल्पयेत् । ३५। एवं सहस्ररुद्राक्षान् यः दृढव्रतः धारयेत् तं सर्वे सुराः नमन्ति । तदभावे अपि शिखायाम् एकं रुद्राक्षं मस्तके चत्वारिंशत्, कण्ठदेशे द्वात्रिंशत्, वक्षसि अष्टोत्तर शतं रुद्राक्षं धारयेत् । एकैकं कर्णयोः षट् षट् बाह्वोः, षोडश षोडश करदेशे धारयेत् । एतान् रुद्राक्षान् ये नरे धारयति सोऽपि शिववत् पूजनीयश्च वन्दनीयः भवति ।

मन्त्रोच्चारणपूर्वकं रुद्राक्षं धारयेत् । ईशान-मन्त्रेण शिरसि तत्पुरुषेण कर्णे, अघोरेण मन्त्रेण गलदेशे, तेनैव मन्त्रेण हृद्देशे अपि रुद्राक्षं धारयेत् । अघोरबीजमन्त्रेण करयोः रुद्राक्षं धारयेत् । वामदेवमन्त्रेण उदरे रुद्राक्षं धारयेत् ।

**बोधप्रश्नः—**

१. को नरः शिववत् प्रणम्यो भवति ?

२. कण्ठेकति रुद्राक्षाः धारणीयाः ?

पञ्चरङ्गभिरङ्गश्च त्रिमालां पञ्चसप्त च ।

अथवा मूलमन्त्रेण सर्वानक्षांन्तु धारयेत् ।।(शि.पु. १/२५)

रुद्राक्षधारणसमये मद्यं मांसं तुलशुनं पालाण्डुं तथा शिग्रुं वर्जयेत् । ततः श्लेष्मातकं विड्वराहं भक्षणे वर्जयेत् । सर्वाश्रमाणां वर्णानां स्त्रीशूद्राणां शिवाज्ञया यतीनां च प्रणवेन रुद्राक्षाः धारणीयाः ।

**बोधप्रश्नः—**

१. रुद्राक्षधारणसमये कानि वर्जयेत् ?

**रुद्राक्षभेदः—**

एकवक्त्ररुद्राक्षः साक्षात् शिवस्वरूपो भुक्तिमुक्तिफलप्रदश्च । तस्य दर्शनमात्रेण ब्रह्महत्या पापात् मुच्यते । लक्ष्मी वर्द्धते । विघ्नाः दूरीभूताः भवन्ति । द्विवक्त्रः रुद्राक्षः देवदेवेशस्वरूपः सर्वकामफलप्रदश्च । स रुद्राक्षः गोहत्यापापं नाशयति । त्रिवक्त्रः रुद्राक्षः साक्षात् धनदः ।

तस्य प्रभावात् विद्याः सर्वे मनसि प्रतिष्ठिताः भवन्ति । चतुवक्त्रः रुद्राक्षः स्वयं ब्रह्म अस्ति। एष रुद्राक्षः नरहत्यां व्यपोहति । दर्शनात् स्पर्शनात् चतुर्वर्गफलप्रदः भवति । पञ्चववक्त्राः रुद्राक्षः साक्षात् कालाग्निरुद्रस्वरूपः सर्वमुक्तिप्रद-सर्वफलप्रदश्च । अगम्यागमनं तथा अभक्षभक्षणादि पापं रुद्राक्षस्यास्य धारणेन नश्यन्ति । षड्वक्त्र तु कार्त्तिकेयः । दक्षिणभुजे इमं रुद्राक्षं धारयेत् । अनेन ब्रह्महत्यादिकैः पापैः मुच्यन्ते । सप्तवक्त्ररुद्राक्षस्य नाम अनङ्गः। तस्य धारणात् दरिद्रोऽपि ईश्वरो भवेत् । अष्टवक्त्रः रुद्राक्षः नामतः वसुमूर्त्तिभैरवः । तस्य धारणात् अल्पायुः पूर्णायु भवति । नववक्त्रः रुद्राक्षः कपिलमुनिः स्मृतः । नवरूपामहेश्वरी तदधिष्ठात्री अस्ति । भक्तितत्परः सन् तद् रुद्राक्षं वामहस्ते धारयेत् ।

**शिवनैवेद्यमाहात्म्यम्—**

शुचिः शुद्धो दृढनिश्चयः शिवभक्तः शिवनैवेद्यं भक्षयेत् । अग्राह्यभावनाञ्च त्यजेत् । शिवनैवेद्यं दृष्ट्वा पापानि दूरतः यान्ति । यागसहस्रेण अथवा अर्वुदयागैरलम् । शिवनैवेद्यभक्षणेन शिवसायुज्यमाप्नुयात् । शिवनैवेद्यप्रचारेऽपि महत् पुण्यं प्रजायते । आगतं शिवनैवेद्यं शिरसा मुदा गृहीत्वा शिवस्मरणपूर्वकं प्रयत्नेन भक्षणीयम् । यस्य शिवनैवेद्यग्रहणे इच्छा न जायते, स पापिष्ठो नरकं गच्छति । शिवदीक्षान्वितो भक्तः सर्वेषामपि लिङ्गानां नैवेद्यं भक्षयेत् । चन्द्रकान्त-मणिनिर्मितम् अथवा स्वर्णरूप्यादिनिर्मितानां लिङ्गानां नैवेद्यं शिवदीक्षायुक्तानां भक्तानां कृते भक्षणीयमस्ति । अन्यदीक्षान्वितानां शिवभक्तिरतानां नराणां शिवनैवेद्यभक्षणे नियमानि सन्ति । शालग्रामोद्भवे लिङ्गे, रसलिङ्गे, पाषाणे, रजते, स्वर्णे, सुरसिद्धप्रतिष्ठिते, काश्मीरे, स्फाटिके, रत्ने, सर्वज्योतिर्लिङ्गेषु नैवेद्यं चान्द्रायणसमं फलदायकमस्ति ।

ब्रह्मघ्नः शुचिर्भूत्वा यदि निर्माल्यं भक्षयेत् तदा तस्य सर्वपापं प्रणश्यति । यत्र चण्डाधिकारः अस्ति तद् मानवैः न भोक्तव्यम् । यत्र चण्डाधिकारः नास्ति तद् अवश्यं भक्तितः भोक्तव्यम् । वाणलिङ्गे, लौहे, सिद्धे तथा स्वयंभूलिङ्गे चण्डाधिकारो नास्ति । सर्वासु प्रतिमासु च चण्डाधिकारः न विद्यते । अग्राह्यं शिवनैवेद्यं यथा- पत्रं, पुष्पं, फलं, जलञ्च शालग्रामशिलासङ्गात् पवित्रतां याति । लिङ्गोपरिभागेस्थितं द्रव्यं तदग्राह्यमस्ति । परन्तु वाह्यतः लिङ्गस्पृष्टं नैवेद्यं सुपवित्रमस्ति । श्रीशिवपुराणे एवं नैवेद्यभक्षणमाहात्म्यं विधिश्च निरूपितं वर्त्तते ।

**बोधप्रश्नः—**

१. केषु लिङ्गेषु नैवेद्यं चान्द्रायणसमं फलदायकं भवेत् ?

२. कुत्र चण्डाधिकारः न विद्यते ?

**बिल्वपत्रमाहात्म्यम्—**

महादेवस्वरूपो विल्ववृक्षो देवैरपि स्तुतो भवति । लोके यावति विख्यातानि पुण्यतीर्थानि सन्ति तानि सर्वाणि तीर्थानि विल्वमूले तिष्ठन्ति । बिल्वमूले लिङ्गरूपिणं महादेवं यः पुण्यात्मा पूजयति स ध्रुवं शिवं प्राप्नुयात् । विल्वमूले यः लिङ्गं जलैः सिञ्चति स सर्वतीर्थस्नानफलं प्राप्नोति । यः विल्वमूलं गन्धपुष्पादिभिः पूजयति सः शिवलोकमवाप्नोति, तस्य सुखञ्च वर्द्धते । विल्वमूले यः दीपं प्रज्वालयति स तत्त्वज्ञानसम्पन्नो भवेत् । बिल्वशाखायाः नवपल्लवं गृहीत्वा यः शिवं पूजयति सः सर्वपापैः प्रमुच्यते । विल्वमूले यः शिवभक्तं भक्तितः भोजयेत् तस्य पुण्यं कोटिगुणितं भवेत् । तस्य दारिद्र्यं च दूरीभवेत् ।

**शिवनाममाहात्म्यम्—**

विभूतिर्यस्य नो भालेनांगेरुद्राक्षधारणम् ।
नास्ये शिवमयीवाणीं तं त्यजेदधमं यथा ।।१३

परमेश्वरशिवस्य नाम माहात्म्यं सर्वपापहरं महापातकनाशनञ्च । शिवनामोच्चारणेन ब्रह्महत्यादि पापानि नश्यन्ति । तद्यथा-

शिवनामतरीं प्राप्य संसाराब्धिं तरन्ति ये
संसारमूलपापानि तानि नश्यत्यसंशयम् ।।२९
शिवनामामृतं पेयं पापदावानलार्दितैः ।
पापदावाग्नितप्तानां शान्तिस्तेन विना नहि ।।३१
शिवेति नाम पीयूषवर्षधारापरिप्लुताः ।
संसारदवमध्येपि न शोचति कदाचन ।।३२

येषां महात्मनां शिवनाम्नि महद्भक्तिर्जायते तेषां सहसा मुक्तिः भवति । अनेकजन्मतपः तप्त्वा कोऽपि जनः शिवे भक्तिं कर्त्तुं सक्षमः भवति । यस्य शम्भुनाम्नि सर्वपापापहारिणी अखण्डिता भक्तिः जायते तस्यैव मोक्षः सुलभः, नान्यस्य । अनेकपापानि कृत्वा शिवनामजपात्

नरः सर्वपानविनिर्मुक्तो भवति इत्यत्र संशयः नास्ति । परमेश्वरशिवस्य नाम स्मरणात् भक्तः घोरसंसारम् अंजसा सन्तरति । ब्रह्मस्वहरणं कृत्वा तथा च ब्राह्मणान् बहून् हत्वा शिवनामजपात् नरः पापैः न लिप्यते । दावदग्धाः वृक्षाः यथा वने भस्मसात् भवन्ति, तथा शिवनामतः पापानि दग्धीभूताः भवन्ति । शिवनाममहात्म्यं वेदेषु कीर्त्तितं तथा पूर्वजैरपि शिवनाम संसारतारणोपाय इति विनिश्चितं वर्त्तते । शिवनामजपप्रभावेण जनाः सङ्गतिं प्राप्नुवन्ति । पूर्वं महापापः इन्द्रद्युम्न-नृपः शिवनामप्रभावेण सद्गतिं प्राप्तवान् । तथा च बहुपापिनी सौमिनी शिवनामजपेन उत्तमां गतिं प्राप्तवती ।

स वैदिकः स पुण्यात्मा स धन्यस्स बुधोमतः ।
शिवनामजपासक्तो योनित्यं भुवि मानव ।।२५

**कामनानुरोधेन शिवलिङ्गसंख्यानिर्णयः-**

पार्थिवलिङ्गं विना अन्यदेवपूजनं फलदायकं न भवति तथा च दमदानादिकं वृथा भवति । संख्यानुसारं पार्थिवलिङ्गपूजनं फलदायकं भवति । प्रथमतः लिङ्गेषु पृथकतया आवाहनं कुर्यात् । पृथक् प्रतिष्ठा तथा पूजनं च कुर्यात् ।

विद्यार्थिपुरुषः यदि प्रीत्या सहस्रमितपार्थिवं लिङ्गं पूजयेत तदा निश्चितरूपेण फलं प्राप्नुयात् । धनार्थी तदर्द्धकम्, पुत्रार्थी सार्द्धसाहस्रम्, वस्त्रार्थी पञ्चशतकम्, मोक्षार्थी कोटिगुणितं शिवलिङ्गं पूजयेत् । भूकामः सहस्रकम्, यदयार्थी त्रिसाहस्रम्, तीर्थार्थी द्विसहस्रकम्, सुहृत्कामी त्रिसाहस्रम्, वश्यार्थी अष्टशतकम्, मारणार्थी सप्तशतम्, मोहनार्थी अष्टशतकम्, उच्चाटनपरः सहस्रम्, स्तम्भनार्थी सहस्रं, द्वेषणार्थी पञ्चशतम्, शिवलिङ्गं पूजयेत् । चौरभये शतद्वयं शिवलिङ्गं पूजयेत् । डाकिन्यादिभये पञ्चशतम्, दारिद्र्यनाशाय पञ्चसाहस्रमयुतं शिवलिङ्गपूजनं सर्वकामदं भवति । शिवलिङ्गपूजनसंख्यायां मुनिभेदतो मतान्तरमपि उपलभ्यते । तद्यथा-

लिङ्गानामयुतं कृत्वा पार्थिवानां सुबुद्धिमान् ।
निर्भयो हि भवेन्नूनं महाराजभयं हरेत् ।।
कारागृहादिमुक्त्यर्थमयुतं कारयेद् बुधः ।
डाकिन्यादिभये सप्तसहस्रं कारयेत् तथा ।
सहस्राणि पञ्चपञ्चाशदपुत्रस्तत् प्रकारयेत् ।
लिङ्गानामयुतेनैव ह्यतुलां श्रियमाप्नुयात् ।।
कोटिमेकां तु लिङ्गानां यः करोति नरो भुवि ।
शिव एव भवेत् सोऽपि नात्र कार्या विचारणा ।।(शि.पु. १.२१.१७२२)

पार्थिवलिङ्गार्च्चनं कोटियज्ञफलप्रदं तथा नित्यं भुक्तिदं मुक्तिदं च कथितम् । लिङ्गार्चनं विना यस्य कालो गच्छति तस्य दुरात्मनः महाहानिः भवेत् । कलौ लिङ्गार्चनं कामार्थिनां नृणां सर्वाधिकफलप्रदं मोक्षार्थीणाञ्च मोक्षप्रदमस्ति ।

**बोधप्रश्नः—**

१. विद्यार्थी कतिलिङ्गं पूजयेत् ?

२. कस्य महाहानिः भवेत् ?

## सारांशः

पौराणिकोत्तमः सूतदेवः अस्यां संहितायां वैदिकेन तथा पुराणोक्तविधिना शिवलिङ्ग-पूजनमवर्णयत् । तेनोक्तमार्गेण शिवपूजनं भक्तानां कृते भक्तिमुक्तिप्रदायकमस्ति । भस्मशिवा-त्मकस्याग्नेः वीर्यं कथितम् । य भस्मसद्भावं ज्ञात्वा भस्मना स्नाति, स मृत्युपाशात् प्रमुच्यते । रुद्राक्षः शिवस्य प्रियतम वस्तु अस्ति यस्य दर्शनात्स्पर्शनाज्जाप्यात्सर्वपापः नश्यति । शिवनैवेद्यं दृष्ट्वा पापानि दूरतः यान्ति । शिवनैवेद्यभक्षणेन शिवसायुज्यं प्राप्नुयात् । बिल्ववृक्षः महादेव-स्वरूपोऽस्ति । बिल्वमूले लिङ्गरूपिणं महात्मानं महादेवं यः पूजयति, स ध्रुवं शिवं प्राप्नुयात् । परमेश्वरशिवस्य नाम सर्वपापहरं महापातकनाशनञ्च । शिवनामोच्चारणेन सर्वाणि पापानि नश्यन्ति । शिवलिङ्गपूजनं विना अन्यदेवार्च्चनं फलदायकं नास्ति । परन्तु संख्यानुसारं पार्थिवलिङ्गपूजनम् अधिकं फलदायकं भवति ।

## आदर्शप्रश्नाः

**लघूत्तरीयाः प्रश्नाः—**

१. रुद्राक्षभेदः ।

२. शिवनैवेद्यमाहात्म्यं लिखत ।

३. विल्वपत्रमाहात्म्यं लिखत ।

४. शिवनाममाहात्म्यं लिखत ।

५. भस्मधारणविधिः लिखत ।

**विश्लेषणात्मकाः प्रश्नाः—**

१. भस्मतत्त्वं लिखत ।

२. भस्मभेदं निरूपयत ।

३. रुद्राक्षतत्त्वं प्रतिपादयत ।

४. रुद्राक्षधारणविधिः निर्णयत ।

**निबन्धात्मकाः प्रश्नाः—**

१. वैदिकपुराणोक्तविधिना पार्थिवपूजनविधानं लिखत ।

२. कामनानुरोधेन शिवलिङ्गसंस्थानिर्णयं कुरुत ।

**एकाङ्क प्रश्नाः—**

१. कुत्र पार्थिवार्च्चनपूजनं विधीयते ?

२. केन मन्त्रेणावाहानं चरेत् ?

३. केन मन्त्रेण मृत्तिकामाहरेत् ?

४. तेजसः वृत्तिः कतिविधा ?

५. काभ्यामिदं जगत् परिव्याप्तम् ?

६. दग्धगोमयसम्भवं भस्म किमुच्यते ?

७. कीदृशं रुद्राक्षं श्रेष्ठं कथ्यते ।

८. केन मन्त्रेण शिरसि रुद्राक्षं धारयेत् ?

९. चतुर्वक्त्रः रुद्राक्षः कोऽस्ति ?

१०. सर्वासु प्रतिमासु च कस्याधिकारः न विद्यते ?

११. शिवनामप्रभावेन कः नृपः सद्गतिं प्राप्तवान् ?

**उत्तराणि—**

१. नदीतीरे, तडागे, पर्वते, कानने, शिवालये अथवा शुचौ देशे, २. मा नो महान्तामिति, ३. सद्योजातं प्रपद्यामि, ४. द्विविधा, ५. शिवशक्तिभ्याम्, ६. आग्नेयभस्म, ७. धात्रीफलप्रमाण-सदृशम्, ८. ईशानमन्त्रेण, ९. स्वयं ब्रह्मा, १०. चण्डाधिकारः, ११. इन्द्रद्युम्ननृपः ।

***